CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

श्री. पं. मुकुन्द नाथ शर्मा भट्टराई. निवासनकोसिला. सिद्धथर. धा. जि. नेपाल

ॐ

वाचं धेनुमुपासीत

नेपालस्य

[इतिहासप्रधानं विविधविषयविभूषितं मासिकं पत्रम्]



प्रथमे वर्षे १. संख्या ८. पृष्ठसंख्या ६४.

संस्कृत-सन्देशः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्पादकौ—

योगी नरहरिनाथः पं० बुद्धिसागरपराजुली च

मूल्यम् ४।, ४) षाण्मासिकम् २।५०, २॥) मासिकम् ।५०,॥)

वि. संवत् २०१० मार्गशीर्षशुक्लैकादश्याम्

शाकसं. १८७५ ने. सं. १०७४

लेखसूची

इतिहास-संशोधनम्	१
श्रीपुरन्दरशिलालेखः	२
राजेन्द्रनिमन्त्रणा	३
लिच्छविसमयाभिलेखः	४
साहसमयपत्रम्	५
श्रीपृथ्वीनारायणोपदेशः	६
मेघदूतकाव्यम्	७
भास्वती	८
महादर्शः	९
अमरसिंहथापाप्रसिद्धपत्रानुवादः	१०
त्रिपुरेश्वरस्तम्भलेखानुवादः	११
चक्रपाणिचर्चा	१२
अंशुवर्मणोऽभिलेखः	१३
नीर्वाणयुद्धसंकल्पः	१४
मल्लसमयाभिलेखः	१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतिहास—संशोधनम्

ॐ नमः श्रीपञ्चतत्त्वात्मने नारायणाय ॥

यं ब्रह्मेन्द्रमुनीन्द्रचन्द्रविबुधा ध्यायन्ति हृत्पङ्कजे,
सर्वात्मानमगम्यमिन्द्रियगणैः सर्वज्ञमाद्यं विभुं।
नित्यानन्दमयं परात्परतरं संसारदिव्यौषधं,
देवं नौमि हरिं त्रिलोकसुखदं पञ्चात्मकं केशवं ॥
प्रह्लादप्रणत प्रसन्नवदन श्रीमत्त्रिलोकीपते,
ब्रह्मोत्तंसमरीचिमांसलपदाम्भोजाय तुभ्यं नमः।
तुभ्यन्नाथ नमो नमः सुरपते लङ्केशदर्प्पान्तक,
क्षेमं संतनुतां पुरन्दरमहीपालस्य नित्यं भवान् ॥
यत्कीर्त्या विमलीकृतं त्रिभुवनं लोकोत्तरं राजते,
यत्पादातपदप्रहारवशतो भूमिर्म्मुहुःकम्पते।
यत्तेजस्तपनोदयेस्तमगमन् भूपालवृन्देन्दवः,
सोभूद्भूतलभूषणो विजयवान् श्रीकीर्तिसिंहो नृपः।
अजनि कुसुमसिंहः शत्रुमत्तेभसिंहः,
समरभुवि करालो मेदिनीचक्रशक्रः।
अमरतरुसमानो विश्वविख्यातकीर्तिः,
सकलबुधजनानामाश्रयो भूमिपालः ॥
एतस्माद्धरणीन्द्रमौलिमुकुटात्सर्वार्थचिन्तामणेः,
साक्षाच्छ्रीजगदीश्वरो नृपवपुः श्रीविष्णुसिंहोऽजनि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुष्टान दण्डयितुं द्विषो दमयितुं त्रातुं सुहृत्सज्जनान्,
भूमिं भूषयितुं तमःस(श)मयितुं कर्तुं व्यवस्थां सदा ॥
विद्वांसो नमयन्ति भूपतिगजान् यत्कीर्तिकाव्यांकुशै,
यं दीनाः कलिकर्णमेत्य न दधुः कर्णस्य कर्णे कथां ।
यं नाथं प्रतिपद्य किञ्च धरणी श्रीरामशोकं जहौ,
सो ऽभूद्द भूपतिमौलिपूजितपदः श्रीविष्णुसिंहः प्रभुः ॥

पुरन्दरस्य जननी, महिषी विष्णुभूपतेः ।
पद्मलक्ष्मीमहाराज्ञी, सदा भर्तृपरायणा ॥

राजा संप्राप्त विष्णुसिंहनृपतिक्षारोदधेरुत्थितो,
लक्ष्मीलक्षितभूमिमण्डलधरः कान्त्या जगत्कान्तयन् ।
वैरिक्ष्मापतिलोककोकहृदये शोकं नितान्तं दिशन्,
श्रीमच्छ्रीलपुरन्दरो विजयते लोकोत्तरश्चन्द्रवत् ॥

अहंकृतवसुन्धराधिपमहेभमूर्धांकुशो,
महाकुलिशपञ्जरः शरणसंगतः(त)क्ष्माभृतां ।
पदच्युतमहीपतिस्वपदरक्षणे पण्डितः,
पुरन्दरनरेश्वरो जयति विप्रकल्पद्रुमः ॥

पुत्रोऽयं पुरुषोत्तमो बिज(य)ते पूर्णेन्दुमुग्धाननो,
यस्तातस्य मुदं तनोति गिरिजेशस्येव लम्बोदरः ।
किं ब्रूमो मधुसूदनोर्जुनमिवारातेरणे भीषणं,
शक्रस्येव जयन्त एष तनयो यो वीरभद्र(ा)कृतिः ॥
तेनाकारि मठो महोच्चशिखरो मालायते जाह्नवी,
पूर्णेन्दुः कलशायते दिनमणिश्चक्रायते सर्व्वदा ।
यत्रायं नवनीलसान्द्रजलदो नीलांनिचोलायते,
नक्षत्रं कुसुमायते सुरवधूप्रक्षिप्तपुष्पांजलौ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वासुदेवञ्च पूर्व्वांषु (वेंतु) याम्ये सङ्कर्षणं प्रभुं ।
प्रद्युम्नं पश्चिमद्वारि कौबेर्यामनिरुद्धकं
मध्ये नारायणरूपं परं ब्रह्मस्वरूपिणं ।
पञ्चतत्त्वात्मकं देवं प्रासादे स्थापितो (स्थापयन्) नृपः ॥
प्रासादमेनमतिभक्तिमता वितीर्य्य,
नारायणाय भजतामभयङ्कराय ।
श्रीमत्पुरन्दरमहीन्द्रपुरन्दरेण,
दत्तं फलं जनकविष्णुमहीश्वराय ॥
चतुर्व्यूहात्मको विष्णुः, प्रासादे स्थापितः स्वयम् ।
पुरन्दरनरेशेन, पितुः सुकृतहेतवे ॥
रविदिनश्रवणर्क्षे कुम्भसंस्थेऽशुमालौ,
मनसिजतिथिमाघे कृष्णपक्षेऽतिरम्ये ।
ऋतुवसुरसचिन्हे वत्सरे विष्णुहेतोः,
कनकरचितकुम्भं मेदिनीशो व्यधत्तः(त्त) ॥
शुभमस्तु सर्वजगतां शिवं भूयात्

अयं शिलाभिलेखो ललितपुरे मङ्गलबजारस्थे विष्णुमन्दिरे वर्तते । रामजीरस्य शिलाभिलेखस्य प्रतिलिपिमगृह्णात् । अस्माच्छिलाभिलेखादैतिहासिकानां ललितपुरविषयका भ्रान्तिर्दूरीभवेदिति संस्कृतानभिज्ञानामुपकारायाऽस्यानुवादो ऽपि प्रकाश्यते ।

अनुवाद

श्री पाँच तत्त्वस्वरूप नारायणलाई नमस्कार छ ।
सबैका आत्मास्वरूप, इन्द्रियहरूले पत्ता नपाइने, सबै कुरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जान्ने, जुग आदि परमेश्वरलाई ब्रह्माजी, इन्द्र., ठूला ठूला ऋषि मुनिहरू, चन्द्रमा. आदि देवताहरू मनमा ध्यान गर्दछन्। सबै आनन्दस्वरूप रहने, ठूला भन्दा पनि ठूला, संसारको दिव्य औषधि, तीनैलोकलाई सुख दिने, पञ्च आत्मा [वासुदेव, संकर्षण प्रद्युम्न, अनिरुद्ध, नारायण] स्वरूप, भगवान् विष्णुको स्तुति गर्दछु ॥ १ ॥

प्रल्हादले प्रणाम गरिएका, हँसिलो मुख भएका, तीनैं लोकक अधिपति हे भगवन्, ब्रह्माजीका शिरका गहनाका किरणले झल मल्ल पाउ भएका हजुरलाई नमस्कार छ। हे देवताका अधिपति हजुरलाई नमस्कार छ। रावणको घमण्ड तोड्ने हे नानाय हजुरलाई नमस्कार छ। हजुरबाट राजा पुरन्दरको कल्याण सा होस् ॥ २ ॥

जसको कीर्तिले उज्यालो पारिएको तीनै लोक सबैभन सुहाइरहेछ। जसका पैदल सिपाहीका पादप्रहारले पृथिवी वा बार काँप्तछिन्। जसको तेजरूपी सूर्य उदाएमा राजारूपी चन्द्र माहरू अस्ताए। त्यस्ता विजयी पृथिवीका गहना श्री कीर्तिसि राजा हुनुभयो ॥३॥

शत्रुरूपी हात्तीमा सिंहसमान, लडाइँको मैदानमा डरलाग्द भूमण्डलका इन्द्र, कल्पवृक्ष जस्ता, संसारमा यश फैलिएका, स विद्वान्हरूलाई आश्रय दिने, कुसुमसिंह राजा नुहुभयो ॥४॥

सबै राजाहरूमा श्रेष्ठ, सबै कुरा दिने, ती महाराजबा दुष्टहरूलाई दण्डदिन, शत्रुहरूको नाश गर्न, साथी र सज्जनहरू रक्षा गर्न, पृथिवीलाई सिंगार्न, अन्धकार हटाउन, असल स्थि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाँध्न साक्षात् भगवान् विष्णु, राजा विष्णुसिंहको रूप लिई पैदा हुनुभयो ।।५।।

जसका कीर्तिका काव्यरूपी अंकुशले विद्वान्हरू अरू राजा-रूपी हात्तीहरूलाई निदुऱ्याउँदैछन् । कलियुगका कर्ण समान जुन महाराज कहाँ आएर गरीवहरूले कर्णको कथामा कान दिएनन् । जुन राजालाई मालिक पाएर पृथिवीले पनि श्रीरामचन्द्रको (विछोडको) शोक गर्न छाडिदिइन् । राजाहरूका शिरपंचले पाउ पूजिएका त्यस्ता महाराज श्री विष्णुसिंह हुनुभयो । ६।।

महाराज विष्णुसिंहकी पत्नी महाराज पुरन्दरकी सुमा पतिव्रता वडा महारानी पद्मलक्ष्मी (हुनुहुन्छ) ।।७।।

महाराज विष्णुसिंहरूपी क्षीरसमुद्रवाट पैदा भएका, श्री संपत्तिले युक्त पृथिवीको पालना गर्ने, आपनो कान्तिले संसार-लाई उज्ज्वल गराउने, शत्रु राजारूपी चखेवाको मनमा ज्यादा पीर पार्ने, महाराज श्री पुरन्दर अहिले चन्द्रमा जस्तै वेजोडसँग सुहाइरहनुभएकोछ ।।८।।

अहङ्कारी राजारूपी मत्ता हात्तीमा अङ्कुशे भएका, शरण पर्न आएका राजाहरूको वज्र जस्तो पिंजडा भएका (रक्षा गर्ने) राज्य च्युत भएका राजाको राज्य थामिदिनामा सिपालु भएका, ब्राह्मणमा कल्पवृक्ष समान महाराज पुरन्दर हुनुहुन्छ ।।९।।

पूर्णचन्द्र जस्तै उज्यालो मुख भएका यी महाराजका छोरा पुरुषोत्तम हुनुहुन्छ । गणेशले महादेवलाई झैं जो आपना पिता-लाई खुशीपार्नुहुन्छ । के भनौं, जो लडाइँमा शत्रुहरूका डरलाग्दा भएका अर्जुनलाई कृष्णले झैं (वावुलाई खुशी पार्नुहुन्छ) वीरभद्रको जस्तो अनुहार भएका जो इन्द्रका पुत्र जयन्त जस्तै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हुनुहुन्छ ॥१०॥

ती महाराज पुरन्दरले टूलो अग्लो मन्दिर बनाउनु भयो। स्वर्गका अप्सराहरूले पुष्पाञ्जलि चढाइएको जुन मन्दिरमा सधैं आकाशगङ्गा माला जस्तो हुन्छिन्, पूर्ण चन्द्र कलश (गजुर) जस्तै हुन्छन्, सूर्य चक्र जस्तै हुन्छन्, नयाँ कालो बाक्लो बादल चँदुवा जस्तै हुन्छ, तारा फूल जस्तै हुन्छन् ।११॥

पूर्व ढोकातिर वासुदेव, दक्षिण ढोकातिर संकर्षण पश्चिम ढोकातिर प्रद्युम्न, उत्तर ढोकातिर अनिरुद्ध बीचमा परब्रह्मस्वरूप नारायण भएका पञ्चतत्वात्मक देवताहरूलाई महाराज पुरन्दरले मन्दिरमा स्थापना गर्नुभयो ।१२॥

भक्तको भय हर्ने नारायणलाई भक्तिले यो मन्दिर चढाएर भएको फल पृथ्वीका इन्द्र जस्ता भएका महाराज पुरन्दरले आपना पिता महाराज विष्णुसिंहलाई समर्पण गर्नु भयो ॥१३॥

महाराज पुरन्दरले बाबुको पुण्यको निमित्त चतुर्व्यूह स्वरूप विष्णुलाई मन्दिरमा आफै स्थापना गर्नुभयो ॥१४॥

(नेपाली) संवत् ६८६ माघ कृष्ण त्रयोदशी आदित्यवारका दिन श्रवण नक्षत्रमा, कुम्भमा सूर्य गएमा, विष्णुको निमित्त महाराज पुरन्दरले सुनको गजुर चढाउनुभयो ॥१५॥

सबै संसारको कल्याण होस् ।

एतावता द्विबाहुरसचन्द्र (१६ २२) मितात् विक्रमवत्सरात् पूर्वस्मिन् कालेऽपि ललितपुरे स्वतन्त्रो राजवंश आसीत्, तस्मिन् राजवंशे च पञ्चषा राजानोऽभूवन्, ते च राजानः क्रमेण ललितपुरराज्यं शशासुरिति प्रत्यक्षं दृग्गोचरी भवति तेषां । राज्ञां वंशक्रमश्च यथा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कीर्तिसिंहः-कुसुमसिंहः-विष्णुसिंहः-पुरन्दरः-पुरुषोत्तमः ।

इत्यङ्कं स्वतन्त्रे वर्तमाने ललितपुरराज्ये भिन्ने च राजवंशे तत्र शासितरि भुक्तवत्सु चोपशतान् संवत्सरान् तद्राज्यं पञ्चसेषु राजसु च केषुचनेतिहासपुस्तकेषु परानुकरणेनाऽन्वेषणाभावेन चैतदुल्लेखोऽपि न दृश्यते । अत्र तावच्छ्रीबालचन्द्रो ललितपुरराज्यविषये यल्लिखति, तदुद्धृत्य दृश्यते ··· ··· पाटन अधिक काल सम्म स्वतन्त्र रहन शक्यो भन्ने कुनै प्रमाण छैन । सत्रौं शताब्दीको प्रारम्भसंम यो काठमाण्डूकै अन्तर्गत रह्यो ।

सत्रौं शताब्दीको प्रारम्भमा ··· ··· ··· लक्ष्मीनरसिंह र हरिहरसिंहमल्लमा कलह भएकोले पाटन पुनः काठमाण्डूदेखि छुट्टिएर स्वतन्त्र राजघराना द्वारा शासित हुनलाग्यो यस प्रकार (१६०३ ई) देखि पाटनको पुनः स्वतन्त्र अस्तित्व देखिन्छ (नेपालको ऐतिहासिक रूपरेखा १९३ पृष्ठ)

[ललितपुरराज्यं बहुतिथं कालं स्वतन्त्रमवर्ततेति किमपि प्रमाणं नास्ति । वैक्रमसंवत्सररूप सप्तदशशतकोत्तरार्धात्पूर्वमेतत् (ललितपुरराज्यं) कान्तिपुरराज्यान्तर्हितमेवासीत् ।

वैक्रमसंवत्सररूप्य सप्तदशशतकोत्तरार्धे लक्ष्मीनृसिंहमल्ल हरिहरसिंहमल्लयोः कलहेन ललितपुरराज्यं पुनः कान्तिपुरराज्याद् भिन्नं भूत्वा स्वतन्त्रेण राजवंशेनाशिष्यत । एवं शून्यषट्रसचन्द्र (१६६०) मिताद्वैक्रमाब्दात्पश्चाल्ललितपुरराज्यं पुनः स्वतन्त्रमभूत्]

पूर्वनिर्दिष्टाच्छिलालेखाद् द्विनिषड्भू (१६२२) मिते वैक्रमाब्दे ललितपुराऽधे पुरन्दरः स्वतन्त्रो राजाऽऽसीत्, तत्रः षं तस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वजा इति सिद्धमेव। इत्थं सत्यपि साधने श्री बालचन्द्रो ललितपुरराज्यं शून्यरसपड्भू (१६६०) मितात् वैक्रमवत्सरादेव स्वतन्त्रेण राज्ञा शिष्टं स्वातन्त्र्यमलभत, ततः पूर्वं तस्य स्वातन्त्र्यमासीदिति किमपि प्रमाणं नास्तीति केन प्रमाणेन वदति। यदि किञ्चित्प्रमाणान्तरं तस्य समीपे वर्तते चेत्स तन्निर्दिशतु। अन्यथा सोऽविलम्बं स्वकीयं भ्रममूलकं लेखं संशोधयतु

भोलानाथः पौडेलः

धनवज्रवज्राचार्यः

ज्ञानमणिनेपालः।

ॐ

मोनगृह (माणिग्ल-पाटन) सम्मुख-विद्यमान-चतुर्व्यूह-नारायण-प्रासाद-द्वारि दक्षपक्षस्थितः)

श्रीपुरन्दरसिंहनरेन्द्रस्य

शिलाभिलेखः

स्वच्छलिच्छविकुलकेतुश्रीमानदेवसम्पादितमानगृह (मानगल मानिगल-माणिग्ल-मङ्गल-मङ्गलटोल-मङ्गलबजार)-ललितपत्तन-ललितपट्टन-ललितपुर-पाटन ललितन्रुमा-यंल (पाटनदरबार) तुलजाप्रासादसम्मुखवर्त्तिचतुर्व्यूहनारायणमठद्वारि दक्षपक्षे स्थिते लौहलेपोपलिप्ते शिलाशासनपट्टे पुरन्दरमहीपालादिष्टे नेपाललिपिः २६ षड्विंशतिः षड्क्तयः, १ एकहस्तलम्बायमानो विंशत्यङ्गुलव्यायामो लेखभागः मसृणा कृष्णा दृढाऽखण्डिता च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिला शिलाशिखरे खड्गः, चक्रं, चन्द्रौ, पद्मं, गरुडः, मुसलः, हलम्, द्विश्चतुर्दण्डः, माला चेति चिन्हानि चतुर्व्यूहात्मनो नारायणस्य । १२-१३ इतिद्वौ श्लोकौ कस्याप्यन्यस्य प्रतिभातः । किन्तु हन्त ! मन्दिरेषु मालिन्यम् । नानेन राज्ञा वंशः परिचापितः। श्रीकीर्तिसिंहः । श्रीकुसुमसिंहः । श्रीविष्णुसिंहः । विष्णुसिंहमहिषी श्रीपद्मलक्ष्मीः । श्रीपुरन्दरसिंहः । युवराजः पुरुषोत्तमः । शिवदेववत्सदेवीजयदेवानुकृत्या प्रासादं विरचय्य पुन्दरेण पद्मलक्ष्म्या च पुण्यं दिघङ्गताय विष्णुसिंहाय प्रदत्तम् । गोष्ठीप्रबन्धस्तु पृथक् स्यात् । नात्र शासने । ५ पञ्चपुरुषावर्णिताः । १६ षोडश श्लोकाः ।

योगी नरहरिनाथः

राजेन्द्रनिमन्त्रणा

ॐ नमो रत्नत्रयाय ॥ ॐ नमो गुरुगणेशाय ॥ ॥ यस्य प्रसादकिरणैः स्फुरितात्मतत्त्वरत्नप्रभापरिकरप्रहतान्धकाराः । पश्यन्त्यनाविलदृशः सविलासमुच्चैस्तस्मै नमस्कृतिरियं गुरुभास्कराय ॥१॥ अतः परं श्रीमहाराजधर्णनम् ॥ : ॥ स्वस्ति श्री पश्चिमाशागोरक्षाधिष्ठिताचलेन्द्रादसमसमरसाहससमासादितसमस्तसिंधुसीमासमुच्छलदविरलधिमलयशःकलापकलितधवलङ्कृलघसुधाधधूदत्तभोगसौभाग्यगर्वखर्वीभूतविपुलमल्लनेपालभूपप्रतापः ॥ श्रीपृथ्वीनारायणसाहदेववर्मा अष्टाष्टाष्टभिर्युते नेपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लाब्देनेपालविजयीस्माभूत् ॥१॥ तदौरस श्चमल्लनेपालभूपतीन्द्ररमणीविलासानां विलोपको मूर्त्तिमान् शाप इव श्रीमत्श्री ५सिंहप्रतापसाहदेववर्मा तत्तद्देशकुलमर्य्यादास्थापकः स्म बभूव ॥ २ ॥ तदौरसश्च प्रणतिप्रतिबिम्बितानन्तसामन्तवक्रशतपतेकपात्रीकृतविमलमणिपोदपीठः । श्रीमच्छ्री ५ रणबहादूरसाहदेववर्मा हयग्रीवभैरव इव त्रितत्त्वमूर्तिश्चिरं क्ष्मां पालयतिस्म ॥ पंचाशत्तमे वयसि च ॥ स्वस्तिश्रीसमस्तयोगकलाकोविदयोगीन्द्रगणचिन्तनीयसच्चिदानंदस्वरूपपरिपूर्णपरब्रह्मानुचिंतनतदेकताधिगमैकलालससांसारिकसकलविषयाभिलाषविनिर्मुक्तमानसेत्यादिविविधलोकोत्तरगुणग्रामाभिरामश्रीमच्छ्री ५ महानिर्वाणानन्दस्वामिनः सत्कर्म्मशालिनः इति स्वामिसंज्ञां लभन्तेस्म ॥ ॥ तदनु तदात्मजः सुहृत्कुलकमलविकाशवासरेश्वरः स्फीतशौर्य्यमहावंशवनसात्विकपञ्चाननः पितृदत्तां श्रियमबालं पालयन् श्रीमच्छ्री ५ गीर्वाणयुद्धविक्रमसाहदेववर्म्मा जगतीं समनुशास्तिस्म ॥ अतः परमिदानीं श्रीमन्नेपालदेशोत्तमललितपुरे शाक्यसिंहस्वयंभूश्रीगुह्येशीत्रिलोकैकविजयपशुपत्यादिनित्योत्सवाढ्ये ॥ श्रीगोकर्णेश्वराद्यैरथ च नयनिधानादिवाग्वत्यभिख्यैस्तीर्थैस्तीर्थीकृतेस्मिन् विजयत अधिपो राजराजेन्द्रसाहः ॥ ॥ स्वस्तिश्रीगिरिराजचक्रचूडामणिनरनारायणेत्यादिविविधविरुदावलीविराजमानमानोन्नततुहिनगिरिवरासन्नभूमण्डलाखण्डलनेपालेश्वरश्रीपशुपतिचरणकमलधूलिधूसरितचूडारत्नजगद्गुरुणैकतत्परदानपारमितापारंगताः श्रीमच्छ्रीश्री ५महाराजाधिराजश्रीराजराजेन्द्रविक्रमसाहबहादूरसमसेरजङ्गदेव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्म्माणः सदा समरविजयिनः नेपालेश्वरश्रीमदार्य्यावलोकितेश्वरश्रीदीपङ्करतथागतादिबुद्धभट्टारककल्पितांशाः राजोपस्करविविधदिव्यवाद्यध्वनिछत्रध्वजपताकावलिसन्नद्धसबलमन्त्रिजनरलभीमसेनानुचराः हस्त्यश्वरथपादातैर्जगंत्यालादयमानाः दुर्गतपौरोद्धरणानुकंपकाः । श्रीमंतो भवंतो महोदेशेन दिशः प्रकाशयंतः पौषशुक्लतृतीयायां रविदिने मकरसंक्रांतौ जिनप्रियनामकसम्यक्संघभोज्ययात्रामारभ्य यावत्समाप्ति श्रीललितपुरमहानगरे पंचबुद्धात्मकस्तूपविश्वयमान्तकबटुकभैरवाधिष्ठितलगनक्षेत्रनामकप्रदेशं विराजयंतो ॥ विजयंतामिति त्रिकायं समाधाय ॥ श्रीदीपङ्करतथागतप्रीत्या ॥ यथाशक्त्युपचारपूजार्पणेन चतुर्वर्गफलप्राप्त्यै ॥ श्रीनरनारायणब्रह्मशङ्करत्रिरत्नरूपान् ॥ श्रीमच्छ्री श्री ५ महाराजाधिराजश्रीराजराजेन्द्रविक्रमसाहदेवान् विज्ञप्त्या निमन्त्रयाम्यहं ।। ललितपुरमहानगरे ।। मणिगलोत्तमदेशे ।। श्रीहिरण्यवर्णमहाविहारावस्थितश्रीशाक्यमुन्युपासकजयनरसिंहस्य प्रथमपुत्रभाजूनरसिंहनामाभाजुधनसिंहनामकजीवनधनसिंहनामकभ्रातृद्वयसपुत्रपरिवारः ॥ ।। श्रीमन्नेपालवर्षे श्रुतिविशिखनिधौ ९५४ विक्रमाब्दे खखेटाष्टैकाढ्ये १८९० क्रोधिसम्वद्धिमसमयऋतौ पञ्चपञ्चांबुदाढ्ये १७५५ ॥ शाकेब्दे पौषशुक्ले सरविदिनतृतीयातिथौ वासवर्क्षे ॥ चक्रे सम्यग्विधानं मकरगतरवौ भाजुनसिंहनामा ॥ यावद्दीपशिखांतरस्थदशया तैलं जरीगृह्यते । । रात्रौ दीपशिखा निरस्यति तमश्छायानुपातं विना ।। यावच्चन्द्रमसश्च्युतामृतरसाद्वांकुरो जायते तावत्कीर्तिरियं चरिष्यतु चतुवर्गप्रदाशाश्चता ॥ ॥ येनैव सत्येन जिनो जितारिः स सत्यवादी रिपुरस्य नास्ति । तेनैव सत्येन इहास्तु स्वस्ति मुच्यंतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वेद्य महाभयेभ्यः ॥ यानीह भूतानि समागतानि ॥ स्थितानि भूमावथवान्तरिक्षे ॥ कुर्वन्तु मैत्रीं सततं प्रजासु दिवा च रात्रौ च-चरंतु धर्मं ॥ ॥ कृतिरियं महावुद्धोपासकसुंदरानन्दस्येति ॥ शुभमस्तु सर्वदा ॥

एकहस्तव्यङ्गुलमव्यायमानमेकवितस्तिव्यङ्गुलव्यायतनेपालकर्गलपत्रमिदं हरितालालिप्तं सार्धागुङ्लविस्तृतलोहितरागकृतलेखा परिधिवल्लीवलितमतिललितं ललितपुराधिवासिना सुन्दरानन्देनवज्राचार्येण सम्पादितं तात्कालिकस्थितिबोधार्थं यथास्थितं प्रकाशितमिति विदितमस्तु भवतां पाठकमहानुभावानाम्। मूलमस्य राजकीयपुस्तकालयेऽस्ति। भाषानुवादो सिद्धाचलमृगस्थलीगोरक्षपीठेऽस्ति। मूलप्रतिलिपिः पं. घनश्यामशर्म्मणा पौड्यालेन कृता। अनुवादप्रतिलिपिः प्रां. मं. देवीनाथेन योगिना कृता। द्वाविमौ नः सहयोगिनौ। इयमतीव भद्रा शैली भूपनिमन्त्रणायाः। यत्र पुरावृत्तं समासतो विद्यते। नेदानीमियमिह परिपाटीतिवैयात्यम्।

योगी नरहरिनाथः

अनुवाद

श्रीगुरुगणेशो जयति ॥ ॥ स्वस्तिश्रीगोरषनाथले अधिष्ठान गरेर रक्षा गरी राष्या का. पश्चिमदिशामा का. अस्तपर्वत देषिन् जोडा न पाया का संग्राम गरि राज्य लिनु मनसुवा गर्दा श्रीपर्वतराज नरभूपाल माहाराजा कन राजकुमार श्री ५ पृथ्वीनारायण राजा जो छन् सो शय नाल का सिपाहि पटोलि कन तीर्थयात्रा को मनसुष सहजै गोर्षा देषिन् प्रस्थान गरि कन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपालको तमासा नजर्गर्नु हुदा अरणा का सिंग भरि रुपैञा खर्च गर्दै दैवुन् नुघाकोट दहँचोक संम पुग्नु हुदा उचा जगा भया को कीर्त्तिपुरमा कटक गर्दा शेनाल का सीपाही भयाका राजाले हामीसंग जोडाहुनु क्या प सक्ला भनि कीर्त्तिपुर्‍याले न तेढदा वर्ष ६ नाघि गयो ताहा पछि नेपालमा ललितपत्तनको प्रधान हरूले संकेतको कागत चिठि पठाउदा त्यो संकेतको अर्थमालम गरि नेपालका अधिष्ठाता देवताहरूलाई आराधना गरि स्मरण गरि कन गुप्त संग केहि भेटि चढाई पठाउदा हुदा देवता हरू सन्तुष्ट भै प्रसन्न भयेर सपनामा वरदान दिंदा सातौंवर्षमा जोडी न पाया का संग्रामले कीर्तिपुर फते गरि नेपाल भूमण्डल प्रभृति आसमुद्रांत पृथ्वी का अनुभवको वासना पाऊदा नेपाल भूमण्डल-भोग्य गर्‍याका निःकण्टक यश फैलाउदा तेहि यशरूपी सेतो कपडा पहिर्‍या जस्तै यशले व्याप्त गरि ढाक्या की आसमुद्रान्त पृथ्वी रूप रानीले अर्पण गरि चढाया का नाना सौगाद हाति घोडा हेरा मोति कुचिन् किम्खाप आदि नेपाल भूमण्डलका ऐश्वर्य्यको अनुभव गर्न पायाका भाग्यका दौलतले तिन् सहर नेपालको राजा जयप्रकाशमल्ल १ तेजोमल्ल १ रणजितमल्ल १ इ तिन् राजन् कन भादगाउंका दरबारमा बंधन राप्तै देश देशका काजि प्रधानहरूको आव्रु न राषि अरु प्रजाको आव्रु राषि कन निःकण्टक राज्य गर्नु भयाका श्री ५ पृथ्वीनारायणसाह जो छन् सो अघि उत्साह पदार्थले विराजमान हुदा भयाको नेपाल संवत् आठसय अठासी ८८८ ॥१॥ श्रीमहाराजा पृथ्वीनारायण-साह प्रवेश भया पछि तिने महाराजा का औरस पुत्र श्रीसिद्धप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तापसाह जोछन् सो मल्लराजन् हरूकन बंधन पार्दा अगति भया का रानीहरूले वियोगको पहिरन् पहिरी कन विंति गर्न लाग्दा एका मल्ल राजालाई काशीवासको हुकुम गर्दा भया एका मल्ल-राजा लाई आर्य्याघाट मा मुक्त गराया आत्महत्या गर्न्या एका मल्ल राजा लाई चंडाल को हात संपि दिया एस्तै प्रकार सित मल्ल रानी हरूको सुख भोग विलासको नाश पार्न्या प्रत्यक्ष (शा) ताप रूपै भया का श्रीमहाराजो सिंहप्रतापसाह जो छन् सो तिन् सहर नेपाल मा देशको मर्यादा कुलको मर्यादा राष्ट्रै नेवारको प्रजा को दर्द राषि कन औ दोयं सिं चाहल् भन्या का चार प्रकार का खेत को पोता दरि आली वालीको भोग्यगराउ-न्या श्रीमहाराजसिंह प्रतापसाह भै गया ।२॥ श्रीमहाराजा सिंहप्र-तापसाह का औरस पुत्र श्रीरणवाहादुरसाह जो छन् सो हीरा मोती आदि अमोल रत्न जड्या का पीठासन मा वसि कन राज गर्नु हुदा मा चौवीश राजन् हरू प्रणति नम्र भै शिर नयायी शर-णागत भया का सामन्त राजलोक का मुख स्वरूप जो छन् सो सलाम् गर्दामा छाया पर्दा फुल्याकाकमल फुल चढाई पूजा गरि-कन राष्या का ढेरै कमल का फूल राष्याजस्तोदेखिछन् अर्थात् सामन्त राजन् हरूको शरणपात्र भयाका श्री महाराजो रणवहादुर (साह जोछन् सो भैरवजस्तो सत्वगुण रजोगुण तमोगुण इतिन् गुणको त्रितत्व ज्ञानले घोर मूर्तिकन पोई चिरकाल पर्यन्त राज्यै-श्वर्यको अनुभव गर्नु भयाको महाराजा श्रीरणवहादुर साह जोछन् सो तत्समान राजा न भूतो न भविष्यति ॥३॥ सो ही श्री रणवहा-दूरसाह जोछन् पंचाशवर्षका अवस्थामा अठाह्रमैन्हा का आपना कुमार श्रीगीर्वाणयुध्दविक्रमसाह लाई राज्याभिषेक दिई

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आफु. स्वस्तिश्रीसमस्तयोगाभ्यासमा निपुण भयाका, योगीन्द्र, परमहंसहरूले चिताउन्या, स्वरूपचित्, ई दुई पदार्थ को आनंद स्वरूप ले भरि पूर्ण, भै कन, परं ब्रह्म को ध्यान गरि, परं ब्रह्म का सायुज्य पाउना मा, लांसस - या का संसारको विषय वासना, सूक् चन्दन वनिता आदि पदार्थ त्याग गरि, समलोष्ठ कांचन भयेर द्रव्यको लोभ कतिन राखि, केवल श्रीशिव जीको आराम फुलवारि चढाई शुद्ध चित्त भै, गंगास्नान गरि, फर्केर, केवल नैर्वाणिक गुणसमुदायमा, मनोज्ञ सित खेलन्या भयाका सत्कर्मशाली श्रीमहानिर्वाणानंद स्वामि, कहलाउदा भया का, श्रीरणवहादूरसाह भं गया ॥ ३ ॥ श्रीरणवहादूर साह का कुमार श्रीगीर्वाणयुद्धविक्रमसाह जो छन्, सो तिन पुस्ता का, इष्ट मित्र प्रजा गैहगुरू प्रोहित हरू कन, कमल का फुल जस्तो गरि, श्रीसूर्यले, प्रकाश गर्छन्, तस्तै गरि, सात्विक स्वभाव ले, पालना गरि राष्ता भया, अघिका भंदा शौर्य्य वीर्य्य ले महाप्रबल भया का आफ्ना वंश विशे, वनमा सिंह जस्तो कसैले भिचन न शक्न्या भै सात्विक स्वभाव को राजसिंह श्रीगीर्वाणयुद्धविक्रमसाह जो छन् सो वालकै देखिन् पितृचरण ले अभिषेक गरि दिया का राज्यैश्व र्य्य कन गरेर कोत आदि निर्मल कीर्ति कन राष्ता भया ॥४॥ आजकाल नेपाल संवत् नौसय चौंपन्न साल मा हाम्रा गरीप का भाग्यले श्रीमाहाराजा राजेन्द्रविक्रमसाह विराजमान ले प्रसन्न भयाका गिरिराजचक्रचूडामणि इत्यादि कहिया का प्रशस्ति ले गरि ललितपत्तन नगर का लगनखेल मा सम्यक् भन्याका भगवान् दीपंकर तथागत को यात्रा गर्नाकन भाजु नरसिंह वाडा ले निमंत्रणा गर्न्याको अर्जी साफल्य गर्नु होला ॥ इति शुभम्

भाषामा अशुद्ध पदार्थ क्षमा राष्नु होला शुभम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लिच्छविसमयाभिलेखः ।

[अस्य समयो वि. सं. ६२४]

पशुपतेर्मन्दिराङ्गणात्पश्चिमायां दिशि रथ्याया उत्तरस्यामन्तराङ्गण एकं लघु मन्दिरं वर्तते । मन्दिरे शङ्करनारायणयोर्मिलिता पूर्वाभिमुखी मूर्तिर्वर्तते । तस्या एव मूर्तेः पादपीठे समुत्कीर्णोऽभिलेखो वर्तते । अयमभिलेखोऽप्रकाशितपूर्वो वर्तते । उत्कीर्णाभिलेखस्य पीठात्मकस्य पाषाणस्य दैर्घ्ये सप्तत्रिंशद् विस्तारे षोडश पिण्डे नवाङ्गुलानि समुपलभ्यन्ते। अत्रत्यां लिपिं गुप्तलिपिं वदन्ति बुधाः। केचिदिमां कुटिललिपिं वदन्ति। वस्तुतस्तूभयात्मिकेयं लिपिः। अक्षराणि स्थूलानि सुन्दराणि च सन्ति। अत्र षड्क्रम एकादश। प्रतिषड्क्रमक्षराण्यासन्नपञ्चाशानि सन्ति। प्रथमश्लोकस्य द्वित्राण्यक्षराणि विनान्यानि सुपठानि अत्र पञ्च श्लोका एकं गद्यवाक्यं च सन्ति। प्रथमः श्लोकःस्रग्धराच्छन्दसि, द्वितीयतृतीयौ मन्दाक्रान्तायां,चतुर्थो वसन्ततिलकायां पञ्चमश्च शार्दूलविक्रीडिते । अत्रत्यसंवत्सरश्च शकसंवत्सरः। अतः शिलालेखस्य समयः ६२४ मितो विक्रमवत्सरः ।

अत्र सम्पृक्तायां मूर्तेर्दक्षिणाङ्गमर्धशङ्करात्मकम्। वामाङ्गमर्धनारायणात्मकम्। शङ्करस्य हस्तयोस्त्रिशूलमक्षमाला च नारायणस्य हस्तयोश्चक्रं शङ्खश्च । मूर्तेर्दक्षिणभागे पार्वत्या वामभागे लक्ष्म्या मूर्ती वर्तते । इयं मूर्तिस्तु स्वामिवार्तेन स्थापिता न प्रतिभाति । तां प्राचीनां मूर्तिमपास्य केनचित् पश्चात्स्थापितेति निश्चीयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्याभिलेखस्य सम्पादने सहायकर्तौ गतौ धनवज्रवज्राचार्यज्ञानमणिनेपालावभिनन्दामः ।

१ ॐ पत्योर्न्नौ पश्य हे श्रीर्य्युगलमभिथुनं शूलभृच्छार्द्धपाण्यो रेकैकस्यात्र किन्तन्न सुकरमनयोस्तौ यदेकत्र पृक्तौ मद्वित्य(ा) (तस्य)

२ नूनं सखि मदनरिपोरेवमुक्त्वा भवान्या यो द्रष्टो जातु तस्मै सततमिह नमोस्त्वर्द्धशौरीश्वराय ॥ संवत् ४८९ प्रथमाषाढ

३ शुक्लद्वितीयायाम्भट्टारकमहाराजश्रीगणदेवे कालमपरिमितं समाज्ञापयति परमदैवतश्रीभीमगुप्तपादानुध्यातो विदि

४ तविनयः शश्वत्कुशलकर्म्मण्युपहितपरमानुग्रहः प्रकृष्टकुलजन्मा दिघमुपगतयोर्म्मातापित्रोरात्मनश्च पुण्योपचितये

५ स्वामिवार्त्तः सकलभुवनसम्भवस्थितिप्रलयकारणमनादिनिधनं भगवन्तमिह शङ्करनारायणस्वामिनं प्रतिष्ठापितवानपि च

६ योसौ सर्व्वत्रिभुवनगुरुः श्रेयसाञ्चाधिवासो यस्मिन्बद्धा नियमितफलाः सम्पदः पुण्यभाजाम् नानारूपं भुवनमखिलं

७ धार्य्यते येन चेद तस्मिन्भक्तिर्न भवति वृथा शुद्धचित्ताशयानाम् ॥ भिन्ने पुसां जगति च तथा देवताभक्तभावे पक्षग्राह भ्रमित

८ मनसाम्पक्षविच्छित्तिहेतोः इत्यर्द्धाभ्यां समुपरचितं यन्मुरारीश्वराभ्यामेकं रूपं शरदिजघनश्यामगौरं तदव्यात् ॥ पुण्यानि ये

९ प्युभयलोकसुखावहानि कुर्व्वन्ति हि प्रतिदिनं विगताभिमानाः कृत्वापि तेत्र विधिवद्विषयोपभोगं स्वैः कर्म्मभिः सुकृतिनो दिघ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१० माघसन्ति ॥ पुसां पापकृतामधः सुकृतिनामूर्द्ध्वस्थितिर्द्धी-
मतामित्येवं प्रविचिन्त्य निश्चितमतिः सम्प्रज्ञया प्रज्ञया दृष्टादृष्ट

११ विधिप्रयोगनिपुणो वार्त्तः स्वपुण्याप्तये मूर्त्तिङ्केश-
वशङ्करार्द्ध रचितामस्थापयद्भक्तितः ॥

अनुवाद

हे संगिनी लक्ष्मी, त्रिशूल र शार्ङ्ग हातमा लिएका हाम्रा पति-हरूको जोइपोइ वेगरको जोडा हेर न । कामदेवका शत्रु (ती) [महादेव] मसँग छुट्टिनाले ती दुइटै [महादेव विष्णु] एक भई मिलेका हुनन् । अब त यी दुइटामा एउटा एउटाले पनि गर्न नशकिने काम यहाँ के होला र । पार्वतीले यसो भनेर कुनै दिन जसलाई हेर्नु भएथ्यो । ऊ अर्ध शङ्करनारायणलाई सधैं नमस्कार होस् ।

संवत् ४८९ प्रथम आषाढ शुदि द्वितीयामा । भट्टारक महाराज [महाराजाधिराज] श्रीगणदेवबाट धेरै काललम्म राज्य गरिरहनु भएको समयमा, हूला मालिक श्रीभीमगुप्तका हजुरबाट अनुग्रह पाएका, अनुशासन जानेका, सधैं बढिया काममा हूलो अनुग्रह देखाएका, हूलो कुलमा जन्मेका, वार्त्त [जागीरदार] स्वामीले स्वर्गमा गएका [आपना] आमा बाबुको र आपनो पनि पुण्य बढाउनाका लागि सारा संसारको सृष्टि स्थिति प्रलयका कारण भएका, आदि र अन्त्य [जन्म र मरण] नभएका परमेश्वर शङ्कर नारायणलाई यहाँ स्थापना गरे । अरू पनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जो तीनै लोकमा सबभन्दा ठूला र कल्याणका घर पनि हुनुहुन्छ। पुण्यात्माहरूले जसलाई अर्पण गरेको संपत्ति ठीक ठीक फल दिने हुन्छ। नानारूप भएको यो सारा संसारलाई जसले अड्याइराख्नुभएको छ। मनको अठोट शुद्ध पारिसकेकाले उनै [परमेश्वर] मा गरेको भक्ति सित्तै खेर जादैन।

त्यस्तै संसारमा मानिसहरूको भिन्नाभिन्नै देवताहरूमा भक्ति भाव हुन गई पक्षपातमा परेर मनमा भ्रम भएका [ती मानिस] हरूको पक्षपात हटाउनाका लागि विष्णुले र महादेवले आधा आधा भई यसरी जुन एउटै मूर्ति बनाउनुभएको छ, शरत् ऋतुको मेघ जस्तो कालो र गोरो भएको त्यस [मूर्ति] ले रक्षा गरोस्।

जसले अहङ्कार नलिएर दुवै लोकमा सुखदिने धर्म कर्म दिनका दिन गर्दछन्, ती धर्मात्माहरू ता यस लोकमा राम्रोसँग सुख भोग गरेर पनि आफ्ना धर्म कर्मले स्वर्गमा बस्न पाउँछन्।

पापी मानिसको अधोगति धर्मात्मा बुद्धिमानको उभो गति हुन्छ भन्ने कुरालाई कुरो राम्रोसँग पक्कडन शक्ने बुद्धिले विचार गरेर अठोट बाँधी यो लोक परलोक दुवैतिरको काम गर्न सिपालु भएका धार्त्त [जागीरदार] ले आफ्नो र आफन्तको पनि पुण्य बढाउनाका लागि विष्णु र महादेवको आधा आधा [जीउ] बाट बनेको मूर्तिलाई भक्तिपूर्वक स्थापना गरे।

बाबुराम आचार्यः

नयराजः पन्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टिप्पणी—

अत्र चान्यत्र च प्राचीनशिलालिपिषु संवत्सराङ्काः प्रायः सन्दिग्धा इति पुनः सति सौकर्ये तान्येवाक्षराणि काष्ठफलकं निर्माय पाठकानां संशयविच्छित्त्यै विचाराय च प्रकाशयिष्यन्ते। जयदेवशिलालेखमारभ्याद्यावधि येऽभिलेखाः प्रकाशितास्तत्र न खलु निस्संशीतिरशेषतः।

योगी नरहरिनाथः

साहसमयपत्रम्

बाहानमधिवसद्भिर्महामात्यै राज्ञे गीर्वाणयुद्धविक्रमाय प्रहितं निवेदनपत्रम्। इदं नेपालीभाषायां वर्तते। तस्यैव भावस्य संस्कृतभाषायामनूक्तिरियम्। अस्य सम्पादने सहायकतां गतौ रामजी-ज्ञानमणिनेपालाविभिनन्दावः।

[स्वस्ति गिरिराजचक्रचूडामणौ नारायणात्मनि सदा समरविजयिनि महाराजाधिराजे गीर्वाणयुद्धविक्रमसाहे]

निवेदनम्

अथ पूर्वंप्रेषितैर्निवेदनपत्रैरन्यत्सर्वं विदितमेव भवेत्। सौरस्य कार्तिकस्य त्रयोदशे दिवसे मतिसचिवो रणजोरथापाः [कर्मसचिवो वीरभद्रकवरः कर्मसचिवो रामसुन्दरथापाश्च सैनिकानामूनविंशतिं वर्गानादाय [मोरणीदुर्गात्पूर्वस्यामेककोशदूरे स्कन्धावारं निवेश्यावसन्। ..... दिवसानन्तरं ते पत्रमलिखन्। ततो वयमबुध्यामहि। श्रीमौलि [श्रीमोड=सिरमौर] नृपतिरुद्वरणीयः। जैत्रकेऽपि स्कन्धावारं निवेश्य कर्मसचिवो मल्लो निव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

सतु' इति ते समादिशन्। अतो ऽन्तपालः 'श्रीवलभद्रो वज्रतसिंह आलेश्च श्रीरामवाणसंज्ञकेन सैनिकानां वर्गेण सह सौरस्य कार्तिकस्य पञ्चदशे दिवसे रविवासरे शिखरे [टिपा]ऽस्माभिः ग्राहीयेताम्। सौरस्य कार्तिकस्याष्टादशे दिवसे कर्मसचिवोऽपि गमिष्यति। मोरण्यामास्माकानां महामात्राणां राज्ञा सह संलापा अभवन। एतद्विषये तेऽस्माकं समीपे तु पत्रं न प्राहिणवन्। 'अवशिष्टं करमहं समर्पयिष्ये। राज्यत्यागविषये तु पूर्वं यूयं शस्त्रैः प्रहरेथ, ततो युद्धभूमावतरेयमथवा राज्यं त्यजेयमिति' राजोवाचेति किंवदन्ती श्रूयते। सान्तःपुरां राज्ञीं तु स मध्यदेशं प्रापयत्। इदानीमासन्नसहस्राः सैनिकाः सज्जा दुर्गमधितिष्ठन्ति। परितो वर्तमानान् सैनिकांश्च स संगृह्णाति।

अथ शतद्रोः पौरस्त्यानां सीमन्तानां सर्वं वृत्तं मतिसचिवस्य विदितमेव। श्रीमौलिनृपतिरुद्धरणीयश्चेद्भवानजमेरदुर्गमागत्य कर्मप्रकाशं राजानमाह्वयतु। स्वयं राजा सङ्गच्छेत, नोचेद्भवान् यावतो यान् वा महामात्रानाह्वयेत्, ते सङ्गच्छेरन्। एवंकृते ते संहता न भवेयुः, भिद्येरन्, शीघ्रं कार्यसिद्धिश्च स्यादित्यर्थकं पत्रं वृद्धस्य मतिसचिवस्य [अमरसिंहस्य] तथा मतिसचिवस्य रणजोरथापाश्च समीपे संप्रेष्य पत्त्यध्यक्षं शक्तिमल्लं च विदितार्थं कृत्वा पूर्वमेवेतोऽप्रेषयाम। करं ग्रहीतुं प्रेषितो दुर्गपालो भीम[ड]राज थापाश्च मतिसचिवसका शादत्र पश्चादागच्छत्। 'कोऽभिप्राय' इति पृष्टः सोऽवोचत्— श्रीमौलिनृपतिरुद्धरणीय इतीवाभिप्रायमहं त्वश्रौषमिति। मतिसचिवस्य सोऽभिप्रायश्चेद् राज्यान्तर्वृत्तज्ञानमभिविख्यापितदोषस्य राज्ञः समुद्धरणं चाजमेरमध्यासीनेन भवता सुकरं भवेदिति स्वाभिप्रायं समु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्त्वेत्याकारं पत्रं च सत्वरं विलिख्याप्रेषयाम। परं नैतन्मतमुचितममानि। परिश्रान्ताः सैनिकाः। सत्वरमागत्य दुर्गरोधे कृते विलम्बो भवेदिति नो मनसि वर्तते

अथ भृत्यसेनासु मोरणीं समागतासु दिवसचतुष्टयानन्तरं मतिसचिवस्यामरसिंहथापाः सकोशात्पत्रमायात्। तस्मिंश्चैष भावो वर्तते, यथा श्रीमौलिमाक्रमितुं मतिसचिवो रणजोरथापाः कर्मसचिवश्चन्द्रवीरकवरः कर्मसचिवो वीरभद्रकवरः कर्मसचिवो रामसुन्दरथापाश्च प्रहिताः सन्ति। एतेषामाज्ञया यूयं वर्तध्वमिति। मोरणीदुर्गस्थास्ते शस्त्राण्ययाचन्। अत्रत्याः प्रजास्तु पलायन्त। सेनाभारवाहैः शस्त्राण्यप्रेषयामः।

अथात्र मतिसचिवाद्यो यदुचितं मन्येरन् लिखेयुः। निवेदनीयं पश्चान्निवेदयिष्यामः।

इतो नाहानस्थानां सेवकानां चामुभाण्डागारिक (भण्डारी) दीर्घसिंहभाण्डागारिकटीकावल्लभपाँडे-योगनारायणमल्लानां कोटिशो दण्डवत्प्रणामाः सन्तु।

[वैक्रम] संवत् १८६६ कार्तिकशुक्लाऽष्टम्यां भौमवासरे

अथैतावति लिखिते पत्रे पुरुष आगमत्। मतिसचिवोऽमरसिंह थापा वघाटसीम्नि सुवाठीरदुर्गमागात्। तत्रैव स निवसतीति सन्देशं स आहार्षीदिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपालीभाषायां समुपलभ्यमानस्य निवेदनपत्रस्य मूलपाठः । इदं निवेदन पत्रमस्मन्निकटे वर्तते ।

श्रीदुर्गासहाय

श्री सतरुद्रा १ श्री रामवान १

अर्जि

उप्रान्त अरु कुराको विस्तार अघी (अघी) चह्रा (ई) पठाया-का अर्जीले जाहेर भयो हो. कार्तीकका १३ दिन जांदा. काजी रणजोर थापा (स) दार वीरभद्रकवर. सर्दार रामसुन् (दर) थापा १९ कुंपनी तीलंगा ली. मोरणि गढिका नजीक १ कोस पूर्व-ठाना हाली वस्याछ (न्.....) दीन पछी लेषिपठायो र आंहां थाहा भयो श्रीमोडको राजालाई नमेटि भयेन जैंत (क) मा पनी ठाना हाली मल्ल सर्दारले वस्नु भनी पठाया र सुवा वलभद्रज्यु र वषत सीं आले···१··· कुंपनी भन्या १५ दिन जांदा आदित्यवार टिपोमा पठायौं १८ दीन जांदा कार्तीक सर्दार पनी जान्छन्. मोरणीमा हाम्रा भारादारका र राजाको कुरा भन्या तन्या हामिलाई भन्या भारादारवाट केही लेष्येनन्. वाहीडो कुरा सुन्दा वांकि रह्याका रुपञां भन्या म पुग्यांउंछौं राज्यदेषि वाहीक हुनालाई भन्या अघिवाट तह्रा गोली चल्नन् तांहां पछि कित लडनामा पर्सौंला कि राज्य छोडौंला राजाले भनी पठाया भंदा सुनीन्छ रानी र-निवांस भंन्या मधेस उंताऱ्यो छाटा मै हजार धारसय एत्नीषेर गढिभित्र फौंज छ वरपरको फौंज पनि वाटुलो गर्न लागीरहेछ. उप्रांत ···२··· पुर्वका संगुताको चरित्र जस्तो छ काजीले बुझ्यै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

को छ, श्रीमोड भेटनुछ भन्या तपाँइले अजमेर गढिमा आइ बसेर राजा कर्मप्रकासलाइ डाकनु. मोष्य राजा भेटन आउनन् कदाचित् राजा आयेन् भन्या पनी भला मानिस् त जस् जस्लाइ जती जनालाइ डाकनु होला सो आउनन्. यो पाठ भया इन्को मतो जामन पाउँदैन् चिरफोर हुन्छ चाँडो काम होला भन्या विस्तार बुढा काजीलाई रणजोर थापा काजीलाइ लेषि अह्राइ पह्राइ सुवेदार सक्की-मल्लाई अहांवाट अगावै पठायाथ्युं, पछी रुपञ्जाँ लीन पठायाको भीउराजथापा उमरा पनि काजीवाट आइपुग्यो र मन्सुष क्या छ भनी सोद्धा मैले त श्रीमोडमेटन्या जस्तो बुझ् सुन्याथ्यां उन्ले भन्दा त्यो मनसुवा काजीका जती छ त राज्य बुझन्या र राजालाई रेषलाइ चिरफोर गर्न्या काम आपनु बुझको कुरा भन्या तपाइह-रूले अजमेरै मा आइवसनुभया यो कार्ज्य सुक्ष्म होला भनी उन्लाइ पनि धावा गरी एही पाठको चिठि लेषी पठायाको हो यो बुझ ठहरैन छ गल्याका सीपाही छन् चाँडै आयेर कील्लै घेर्दा अलिक ढिलो पर्छ कि भन्या जस्तो लागी रहेछ, उप्रांत भारा-फौज मोरणी आई बस्याका ४ दीन पछी काजी अमरसींह थापा-को चीठि आयो क्या लेष्याको रहेछ भन्या श्रीमोडको काम गर्न काजी रणजोरथापा सर्दार चन्द्रवीर कवर सर्दार वीरभद्र कवर सर्दार रामसुन्दर थापालाई पठायाको छ इन्का सल्लाह चांजामा चल भनी पठायाको रहेछ मोरणीवाट पजानामागी पठाया छन् र वरिपरीका रैती भन्या भागी गया कुंपनी का पीपा लोयेर पजाना पनी पठाञ्जौ ञ्जाहां प्रांत भारादारहरू ज्या ज्या काम ठहराउनन् लेषनन् भया पच्याको पछी वींती गरी पठाउंला सम्वत् १८१६ साल मीती कार्तीक वदी ८ रोज ३ मुकाम नाहान सुभम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतः सेवक चामुभंडारी दीर्घसीं भंडारी टिकावल्लभपांडे जोगनारायणमल्लको कोटि कुर्नेस् वंदगी सलाम् सलाम् स शम् शुभम्—

उप्रांत चीठि लेषी सकीया पछी मानीस आया काजी अमरसींह थापा पनी वघाटको सांध सुवाठोरको किल्लामा आया धांही वस्छन् भन्य (ा ष) वर ह(या) या शुभम्

[अत्र प्रचलितनियमानुरोधेन शिरोरेखा निर्दिष्टा । मूलपत्रे तु नैतादृशी, नापि कश्चन नियमः ।]

बाबुराम आचार्यः

नयराजः पन्तः

राज्ञः श्रीपृथ्वीनारायणस्य स्वान्सभ्यान्प्रत्युपदेशः

[अयमुपदेशो नेपालीभाषायां परम्परीण उपलभ्यते । तस्यैव भावस्य संस्कृतभाषायामनूक्तिरियम्]

[क्रमागतः]

पण्याजीवाः[1] स्वदेशे परजनपदजाश्चेलभेरन्प्रतिष्ठां
स्वीयाः सर्वाः प्रजास्ते खिगलितविभवाः संविदध्युः क्रमेण।
हेतोरस्यैव तेषां न भवतु विषये स्वे कथञ्चित्प्रवेशो
रोद्धव्याः[1] सार्थवाहाः परजनपदजाः[2] स्पर्शदुर्गादधस्तात्।८३।

(१) वणिजः । (२) पर्सागढो भारतनेपालयोः सीम्नि स्थितः स्थानविशेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यावज्जीवं त्यजन्तः परजनपदजं वस्तुजातं वयं तु
वस्त्रैः सौन्दर्यहीनैः परुषगु[1]णमयैः स्वां तनुं छादयन्तः।
माकन्देशस्य भूमिं त्रितयमपि पुरां वाग्वतीनीरसिक्तं
पूर्णन्योमाभ्रपूर्णोश्वरनव[2]मनुजान् प्राक् किरातानजेष्म ॥८४॥

(१) तन्तुः। (२) ९००००००। नेपालस्य पौरस्त्यप्रदेशमधिष्ठिताः किराता नवलक्षसंख्याः सन्तीति तदात्वे प्रत्ययः।

वाह्याद्देशादुपेतं वसनमिह जनो नैव कश्चिद्दधीत
स्वस्मिन्देशे कुवि[1]न्दाः सुधृतपरिचयाः स्वेष्टवस्त्रे विधेयाः।
लब्धाभ्यासैः कु[1]विन्दैर्वसनमिह जना ईप्सितं वाय[2]यन्तु
स्वस्माद्देशाद्धि[3]रण्यं जनपदमितरं याति नास्माद्विधानात् ॥८५॥

(१) तन्तुवायः कुविन्दः स्यात् २।१०।६ इत्यमरः। (२) शाच्छाटाह्याव्यावेषां युक् ७।३। ३७ इति युगागमः। (३) अकुप्यं वसु।

स्वस्मिन् देशे प्र[1]भूतं विविधवनभवा ओषधीः कुप्यजातं
वाह्यं देशं च नीत्वा धनमिह विषये मे प्रजा आनयन्तु।
पुष्येयुश्चेत्प्रजाः स्वा धरणिपरिवृढो वीर्यवत्त्वं भजेत
राज्ञः कोषः प्रजाः स्वा इति नयविदितं वर्त्म जानीत यूयम् ॥८६।

[१] नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् १।२।६९ इति नपुंसकस्य शेषः।

यो दद्याद्वा[1]गधेयं प्रचुरतममसौ स्वामितां कर्षकाणां
लब्धा तेभ्यो गृहीत्वा करमवनिभुजे स्वप्रतिज्ञानुसारम्।
दत्वा शिष्टं च भुङ्क्ते स्वयमिति नगरे घोषणां संविधाय
गृह्णीयाद्वागधेयं नहि धरणिपतिः क्रे[2]तृसङ्घर्षरीत्या ॥८७॥

[१] भागधेयः करो बलिः २।८।२७ इत्यमरः। [२] एतच्छ्लोकोक्ता रीतिः क्रेतृसङ्घर्षरीतिः। यथा २।२१।३६ कौटलीयार्थशास्त्रे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थाने स्थाने पृथिव्याः पतिरधिकरणं स्थापयेद्राजकीयं
सञ्चेतुं राजभागं पृथगधिकरणं तत्र तत्रैव कुर्यात् ।
एतावान् भागधेयः प्रतिसममवनीपालकोशं प्रवेश्य-
स्तत्रेमौ सिद्धसा[1]ध्यौ पृथगिति च भवेद्गाण[2]निक्याधिकारः।८८।

[१] शेषः । [२] द्रष्टव्योऽक्षपटले गाणक्किाधिकारः २।७।२५ कौ. अ.।

योद्धारोऽमात्यवर्गोऽपि च धननिचयं नो कदाचिल्लभन्तां
ते तु स्वां गेहयात्रां निजपदसदृशीमी[1]शतां कर्तुमेव ।
स्वं देशं वीरभूमिं रचयितुमनसो लोककल्याणमिप्सो-
र्नीतेरित्येष मार्गो भवति नरपतेः सर्वदा सेवनीयः ॥ ८९ ॥

[१] समर्थाः स्युः ।

आढ्यो मर्त्यो रणाग्रे प्रसभमरिकृतं शस्त्रवर्षं विषह्य
त्यक्त्वा स्वप्राणमोहं रिपुबलम[1]सितुं नैव तेजो बिभर्ति ।
नष्टे तेजस्विभावे भवति रिपुगणो वर्द्ध[2]नत्वं प्रपन्न-
स्तस्मादेव स्वराष्ट्रे प्रसभमरिगणः स्वप्रभावं तनोति ॥९०॥

[१] क्षेप्तुम् [२] अनुदात्तेतश्च हलादेः ३।२।१४९ इति वृधुषा-तोस्ताच्छील्ये युच् ।

चेज्जायेरन्न सौख्यप्रणिहितमनसोऽमात्यसैन्या मदीयाः
सर्वास्वाशा[1]सु खड्गो मम रिपुहृदयं कम्पयेत स्वशक्त्या ।
सैन्या मुख्याश्च चेत्स्युर्विलसनरसिका मामकीनैर्महद्भिः
कष्टैः संयोजितैषा क्षितिरपि सुफलं नैव यच्छेत्प्रजाभ्यः ॥९१॥

(१) दिक्षु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपालीभाषायां समुपलभ्यमानो मूलपाठः । अयमन्यत्रापि द्विर्मुद्रितः ।

॥ उप्रान्त ॥ देश को महाजन लाई गोढ प्रसाद दे पि उंभो आउन न दिनु देश का महाजन हरु हाम्रा मुलुक मा आया भन्या दुनिया कङ्गाल गरि छाड्दछन् हामि ले च्यागा पाँगा लाइ तिन सहर नेपाल र नौलाख किरायत र हिन्दुपति को राज आउर्य थ्येउ देस का कपड़ा लगाउना लाइ मन्हा गरि दिनु आपना देस का कपड़ा घन्न ज्यान्या लाई नमना देषाई सभाउन् र घन्न लाउनु र यस्व भया नगद विदेश जादैन आपना देश को जिनिस जरि बुटि देस लै जानु र नगद बैचनु नगद बैचि राषनु र प्रजा मोटा भया दरबार बलियो रहन्छ राजा को भण्डार भन्या का रैतान हरु हुन् मुलुक मा इजारा पनि दिनु सरषार घाट अमानित रापि सरषारिया तहसिल रापि साल घ साल को कचा लिनु क्या चुनि सिपाइ भया क्या भैभारादार भया इन लाई दवलथ कमाउन न दिनु आदमि हेरि हुर्मत मात्रै रापि दिनु किन भनौला दवलथ भया का लै तरवार मा पसि मर्न मार्न सक्तेनन् र हरिप को चमक हुन्छ सिपाहि भै भारादार ले स्वप गरैनन् भन्या चारै घुट मा मेरो तरवार बजर्न्यै छ स्वप मा पस्यो भन्या मेरो साना दुष ले आर्ज्या को मुलुक होइन

नयराजः पन्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ

(गोरक्षाचलराजधान्यां रामसाहसमये जयभद्रलिखितम् ।
३३१ वर्षपुराणम्)

मेघदूतकाव्यम्

श्रीगणेशाय नमः ॥ ॥ नत्वा पद्मावतीपादपद्मं सद्म श्रियामहं ।
मेघदूताख्यकाव्यस्य कुर्वे टीकां यथामति ॥१॥

एवं हि किल श्रूयते समस्तप्रशस्तस्वर्वासिप्रवराभिलष्यमाणवेभवस्तत्रभवद्भवानीवल्लभसखो निखिलकिन्नरप्रवरोत्तमाङ्गशेखरीकृतविनयशासनः कदाचित्कमलरक्षाध्यक्षं यक्षमादिदेश । सोपि तदाज्ञावश्योऽलसेक्षणाप्रणयगुणानुबद्धाशयोपि मानसरोवरमार ॥ तत्र कथमपि त्रियामयामद्वयमतिवाह्य रजन्यपि निर्जगामेवेति मन्यमानो निजकांताविरहकातरः स्वाश्रममेवायासीत् ॥ तत्रांतरे क्षणदाप्रांतसमुत्पन्नप्रबोधविधूतश्रोत्रतालास्तरलतरशुंडादंडास्फालनप्रोद्दलितसकलजलजजातयो दिग्गजास्तन्तडागमोलोडयांचक्रुः । कुबेरोपि प्रातरेवाकर्णिततद्वृत्तांतः समुत्पन्नरोषकषायलोचनः चपलतरं तमाहूय स्वकीयजायाव्यसनिनमाज्ञायानयैव तव संवत्सरमदर्शनमस्तु महिमा च विलीयतामित्यशाप्सीत् । मेघमत्र वस्तुनिर्देशमुद्दिशन्नाह । चिकीर्षितस्य काव्यस्याशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखमितिन्यायात् ॥ ॥ कश्चिदित्यादि ॥ ॥ कश्चिदनिर्दिष्टनामधेयो यक्षो गुह्यको रामेण दाशरथिनोपलक्षितो गिरिः रामगिरिः चित्रकूटः पर्वतस्तस्याश्रमा मुनिगृहोस्तेषु वसतिमवस्थानं चक्रे । कृतवान् (इत्यादि) (अन्ते तु)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुत्वा वार्त्तां जलदकथितां तां धनेशोऽपि सद्यः
शापस्यांतं सदयहृदयः संविधायास्तकोपः ।
संयोज्यतौ विगलितशुचौ दंपती हृष्टचित्तौ
भोगानिष्टानविरतसुखं भोजयामास शश्वत् ॥११८॥इति॥

इति श्रीचारित्रवर्द्धनविरचिता मेघदूताख्यकाव्यस्य टीका संपूर्णा ॥ ॥ समाप्तोऽयं ग्रन्थः ॥ ॥ स्वस्तिश्रीगिरिराजचक्रचूडामणिनरनारायणेत्यादिविविधविरुदावलीविराजमानमानोन्नतपारकोटीयवंशोद्भवमहाराजाधिराजश्रीमद्रामसाहनृपस्येदं पुस्तं लेखापितं ॥ ॥ लिखितं जयभद्राख्यद्विप्रेण ॥ ॥ शाके १५४० पौषशुक्ल ११ गुरुदिने ॥ ॥ शुभं । ॥

(अत्र हि– अत्यन्तसुन्दरलिपिर्जयभद्रशर्मा–
ज्यौलस्य हस्तलिखिता परिशुद्धशब्दा ।
श्रीरामसाहनृपतौ किल पारकोट–
वंशोद्भवत्वमिह नूतनवृत्तमास्ते ॥

६६ षट्षष्टिःपत्राणि । पूर्णमजीर्णं च पुस्तकम् । पक्का मसी । पुस्तकायुषि दक्षपक्षे मे टी. वामपक्षे च राम इति । उभयोः पक्षयोरङ्काः । द्वढं गोरखाकर्णलम । क्वचित् ६ षट् क्वचिद्दश । क्वचित्तयोरपि न्यूनाधिकाः षडङ्कयः । १३ त्रयोदशाङ्गुलव्यायामः । ५ पञ्चाङ्गुलव्यायामः । द्वयोः पृष्ठयोर्लेखः । जयभद्रहस्ताङ्किता भद्रा देवनागरी लिपिः ॥ लम्बयुगतो द्रव्यसाहेन सह गोरक्षदेशं नारायणार्ज्यालः समागतः । तस्यान्वये रामसाहसमयेऽयं जयभद्रो जातः । तस्यान्वयाये पृथ्वीनारायणसमये चक्रपाणिः समजनि । तस्य कुले कुलचन्द्रिकादिक्षती रणबाहद्दरसमये देवज्ञकेशरी जज्ञे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्य वंशे संप्रति त्रिभुवनधीरस्य विजयराज्ये पूताचारः सद्विद्य आजीवं संस्कृतभाषामात्रव्यवहारदृढप्रतिज्ञापालकः पद्मनाभकेशरिशर्मार्ज्यालो जरज्जागर्ति। तस्यैव समीपे ग्रन्थोऽयं विद्यते। यतोऽस्माभिर्दृष्टः। अयंग्रन्थः श्रीरामसाहराज्याभिषेकादुद्वादशाब्दानन्तरं प्रायो लिखितः। पारकोटपदेन कस्य निर्देश इति पुराविदोविचाङ्कुर्वन्तु। वयन्तुकृष्णापूर्वात्रिशूलगण्डकीपश्चिमदेघद्दोत्तरहिमालदक्षिणक्षेत्रं मन्यामहे। तदानीं प्रशस्तमिदानीं नेति निदर्शनं न विद्मः। अयमन्योऽपि तस्य सविधे ग्रन्थः पुरोहितजयदेवार्ज्यालपुत्रविद्यानाथतत्पुत्रकमलराजतत्पुत्रख. त्रैलोक्यराजसकाशादानीतः—

भास्वती

[आदौ] श्रीगणेशाय नमः ॥

प्रणम्य चादौ गणनायकं च, रुद्रात्मजं विघ्नविनाश(श)नं च ॥
संक्षेपतो लोकहिताय वक्ष्ये, ध्रुवादितो भास्वतिनामसूत्रं ॥१॥

नत्वा मुरारेश्चरणारविन्दं श्रीमान्सतानन्द इति प्रसिद्धः।
ताम्भास्वतीं शिष्यहितार्थमाह, शाके विहीने शशिपक्षखेकैः१०२१।२।

शाको नवाद्रीन्दुकृशानु ३१७९ युक्तः कलेर्भवत्यब्दगणस्तु वृत्तः।
वियन्नभोलोचनवेद ४२००हीनः, शास्त्राब्दपिण्डः कथितस्स एव३।

अथ प्रवक्ष्ये मिहिरोपदेशात्तत्सूर्यसिद्धान्तसमं समासात्

शास्त्राब्दपिण्डः स्वरशून्यदिग् १००७ घ्नस्तानाग्नि ४३९
युक्तोऽष्टशतै ८०० र्विभक्तः ॥ ४ ॥ (इत्यादि) (अन्ते च)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खखाश्विवेदा ४२०० व्दगते युगाब्दे, दिव्योक्तितः श्रीपुरुषोत्तमस्य श्रीमान् सतानन्द इतीदमाह, सरस्वतीशङ्करयोस्तनूजः ॥ १५ ॥ इतिश्रीसतानंद विरचितेभास्वतीकरणे परिलेषाधिकारोऽष्टमः ॥ ८ ॥ ॥ श्रीशाके १६७३ श्रीसम्वच्च १७०८ आश्विन शु २ रोज ३ ॥ ॥ श्रीगोर्षानगरे गोरखनाथसमीपे श्रीनरभूपालशाहकुमारी-श्रीपद्मकुमारीदेव्यै समर्पयामि ॥ ॥ लिखितमिदं पुस्तकं श्रीशारङ्ग-धरशर्मेणा ॥ ॥ शुभमस्तु ॥ (अत्र पत्राणि १३ त्रयोदश । आया-मः पूर्वतुल्यः । व्यायामः ६ षडङ्गुलः । देवनागरी । स्थूलं गोरखाकर्गलम् । इयं विस्मृतिः विक्रमसंवत्सरेभ्यः शालीवाहन शकाब्दोः १३'५ पञ्चत्रिंशदुत्तरं शतमधिकाभवन्ति । किन्त्वत्र ३५ एवेति १८०८ स्थाने १७०८ लिखिताः ॥ अहो ? तात्कालिककुमा-रीणामपि विद्याध्ययनं संस्कृताभिनिवेशो दुरूहगणितशास्त्रेऽपि प्रवेशः ? धन्यः स देशः । धन्या शैली । आदर्शभूताऽनुकरणीया चेति ।

योगी नरहरिनाथः

मल्लादर्शः

[इदमादौ विद्यते] ॐ श्रीराजराजेश्वराय नमः ॥

स्वभक्तत्वाभावेप्यपरसुरभक्तत्वविरहा-
त्तस्वपाल्यत्वं मत्वा रुचिरतमकामाननुजनं
प्रयच्छंतं त्वय्यप्यकृतवसतीन्सत्वरतरं
पतिं माहिष्मत्याः कमपि भज चेतःप्रतिदिनं ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कौवेर्यां दिशि ताकुमेत्यभिधया ख्यातोस्ति कश्चिद्गिरि-
गण्डक्याः सविधे हि तत्र नृपतिः श्रीसाहमल्लोभवत् ॥
यं प्राप्यामृतभानुभानुबलभित्कन्दर्पकल्पद्रुम-
सन्देहं बहुवेदिनोऽपि मनुजा आकल्पमापेदिरे ॥ २ ॥

तस्माज्जातः श्रीघनश्याममल्लः संतं तातं राज्यलक्ष्मीर्विहाय।
यत्तं भेजे सूचितं तद्धि कोन्यो लक्ष्मीनाथः श्रीघनश्यामदेवात् ॥३

तदीयः सुतः श्रीमलैवम्मनामा नृपालः स्ववंशावतंसा भवंतः।
वरेण्यं यमाहुर्हि संतोयमीशो जयत्यर्थिसार्थार्थितायुष्यवृद्धिः ॥४॥

सत्यास्तंत्रगिरो भवंति तदनुध्यानेन तत्स्था गुणा
ध्यातर्येवमसौ नृपो भगवतः श्रीरामचन्द्रस्य यत् ॥
ध्यानादेककलत्रतासुरवरावासोल्लसत्सेतुता-
शंभुस्थापकतादिकानिह गुणानासादयत्युत्तमान् ॥५॥

अमुष्यैवानल्पा भवति करुणा लोकनिवहे
सतां दत्वा द्रव्यप्रभृति बहु दुःखं शमयतः ॥
समुद्भाव्यर्थोद्भवदमितदुःखव्ययकृते
दुरूहां यंत्रालीं प्रकटयितुमाज्ञां रचयतः ॥ ६ ॥

यंत्रावलीं रचयतः शिवतोपि चासौ
भूयान्कृपालुरिह तां प्रकटीकरिष्यन्
दुर्बोधसारकलिता नहि सेट्टसिद्धयै
चित्रं न तत्र हरिरेष नृपालवेषः ॥७॥

नृपालेनादिष्टो दिनकरगुरूच्छिष्टभजनः
प्रभोर्माहिष्मत्याश्चरणनखशीतांशुकिरणैः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गतायाताज्ञानव्रजतिमिरशब्दार्थरचनः
कथं वा नो कुर्यादयमपि जनो (प्रेमनिधिपन्तः) ग्रंथममलं ।८।
शिवतांडवयंत्राणां ग्रंथार्थादर्शतां गतः ।
मल्लादर्शो मम ग्रन्थः संरंजयतु पण्डितान् ।९।
शिवतांडवटीकेयं स्वल्पाल्पापि सुधीराणां
व्याख्येयार्थगुणौघैः सर्वार्थाकर्षिणी भवति ॥१०॥

अथ जगदेव स्वस्वपूर्वपूर्वजन्मसंचितदुरदृष्टसामर्थ्यनियमित दारिद्र्यादिनानाविधदुःखपंकनिमग्नमुद्विग्नधीर्पुः परमकारुणिको भगवान्सदाशिवः संहितोड्डामरयामलादिनानातंत्रेषु रुद्रदीपजप-होमपुत्तल्यादिरूपमनुपायमुदाजहार ।

(इत्यादि) अरीणां शमने परं तत्परं भवति ततो यंत्रस्य यंत्रत्वं भवतीत्यन्तं शिवताण्डवतन्त्रटीकेयं मल्लादर्शनाम्नी ताकुमपर्वतगलकोटादिमल्लभूपालानामादर्शभूता भूतार्थवादिना प्रेमनिधिपन्तेन निर्मिता पद्मनाभस्यैव सविधे विद्यते । अत्र पत्राणि २९ नवविंशतिः । हरितालकर्गलम् । एकपृष्ठे १२ द्वादश पङ्क्तयः । प्राय ६० षष्टिर्वर्णाः । अपूर्णो ग्रन्थः । ताकुमराजधान्यां राजा श्रौसाहमल्लः समजनि । तस्य पुत्रः श्रीघनश्याममल्लः । तस्य पुत्रः श्रीमलैवम्मः (श्रीमल्लवर्मा) । तस्यादेशादेष मल्लादर्शः प्रेमनिधिना परैरनेकैः सहग्रन्थैर्ग्रथितः । जटिलकूटमयशिवताण्डवतन्त्रे रहस्योल्लासिनी टीका खल्वियम् । किन्तु हन्त । खंडितेति महान् खेदः । कस्यापि सुजनस्य समीपे पूर्णाऽस्ति चेत् सूचयतु । मलैवम्मकुलजन्मा राजा श्रीमान् भरतवर्मा-मल्लः सकलमेव ग्रन्थमिमं संकलयितुमीहते सति चानुकूल्वे प्रकाशयितुञ्च । अयं राजा गोरक्षाधीशश्रीरामसाहदेवस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परममित्रप्रतापिनारायणमल्लकुले लब्धजन्मा लब्धास्पदश्च। सम्प्रति नीलीशालायां (नक्सालें) निवसति। यस्य मध्यमः पुत्रः थिरवम् (स्थिरवर्ममल्लः) वीरगञ्जे वीरगतिं गतः। अनेनोदारचेतसा राज्ञा संस्कृतसन्देशस्योपकृतये स्वदेशनिर्मितमतीव सुन्दरं दृढं मसृणं विस्तृतं कार्गलपटलाष्टकं प्रदत्तम्। यदुपयुक्तं द्वितीयाङ्के। अग्रेऽपि तादृशकार्गलसहयोगाय समाश्वासिताश्चयम्।

योगी नरहरिनाथः

थापान्वयेनामरसिंहेन महाराजोय गीर्वाण-युद्धविक्रमाय प्रहितं पत्रम्

[इदं पत्रं नेपालीभाषायां वर्तते। तस्यैव भावस्य संस्कृतभाषायामनूक्तिरियम्।]

(क्रमागतम्)

जिगीषुभिर्देशमरातिभिर्नो व्यधायि युद्धाय महान् प्रबन्धः।
तस्मादु भविष्यन्ति न ते प्रतुष्टाः प्रदित्सितैस्तैर्भवता प्रदेशैः॥
पणेऽथवाऽस्मन्निहिते पुरस्तादाँग्लैरिदानीमुररीकृतेऽपि।
पश्चाट्टिपौ[1] यद् विहितं, तदेव बाढं विधास्यन्ति च वैरिणस्ते॥

१. टिपुनाम हैदरअलीसूनुर्मैसुरराजः। (वि. सं. १८३९–१८५६)। स आंग्लानां वर्धमानं प्रभावं रोद्धुं प्रयेते। आंग्लाश्च महाराष्ट्रराजेन हैदराबादराजेन च साद्धं सन्धाय टिपो राजधानीं रुरुधुः। असहायश्च स.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शत्रुभ्यो राज्यार्धं द्रव्याणि च ददाऽऽदिष्टसन्धिं चकार । आंग्लेभ्यः स्वं रिक्तिपुःसोऽरवाफ्गानिस्तानटर्कीफ्रान्सदेशाधिपैः साद्धं सन्धातुमियेष । पश्चादांग्ला अनेन सन्धिभङ्गः कृत इति दोषमभिख्याप्य टिपुमाक्रम्य तद्राज्यं वशीचक्रुः ।

"व्ययं गतं रुप्यककोटिषट्कमस्त्यस्मदीयं रणकर्मणीति"।
श्वेताङ्गका वञ्चनचुञ्चवस्तत् कांश्चिद्दिपोरादददिरे च देशान ॥
आ[1]दिष्टसन्धेः करणे सिताङ्गा एवं टिपुं ते विवशं विधाय।
पश्चात्समग्रं विषयं च तस्य प्रचक्रिरे स्वीयवशे बलेन ॥

१ यत्र भूम्येकदेशेन पणेन रिपुरर्जितः ।
सन्धीयते, सन्धिविद्भिरादिष्टः स उदाहृतः ।६।१६। इति कामन्दकः

दद्याम देशानियतः परेभ्यः सन्धित्सवः सम्प्रति चेत्, पुनस्ते ।
व्याजेन केनापि रणं विधाय गृह्णीयुरन्यानपि नः प्रदेशान् ॥
इयत्प्रदेशेषु वशं गतेषु प्रत्यर्थिनामापतितार्थकृच्छ्राः ।
एतावतीं स्थापयितुं च सेनां वयं न सामर्थ्ययुता भवेम ॥
क्षयं गतायां निजसैन्यशक्तौ पौरस्त्यदेशान् परिरक्षितुं च ।
राजन् प्रभूयेत कथं पुरावदस्माभिरेवं प्रभुशक्तिहीनैः ।
अस्मद्वशे वेसहरप्रदेशो वर्तेत संस्थास्नुतया च यावत् ।
तावत्परेभ्योऽपि भयं न किञ्चिज्जायेत तस्मिन् गढवालदेशे ॥

अस्मच्च्युते वेसहरप्रदेशे तस्मिन् हि भोटाभिजना जनास्ते ।
लब्धावकाशाश्च रवाइनस्थाः प्रपीडयेयुर्नियतं प्रभो नः ॥
आङ्ग्ला हि रन्ध्रोनुपदित्वमाप्ता यदा विदध्युः स्ववशे बलेन ।
तौ देहरादूनरवाइनौ च, तदा न शक्या गढवालरक्षा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वशं प्रयाते गढवालदेशे द्विषां ततः कूर्ममहीधरश्च ।
डोटी च निश्चप्रचमेवमस्मत्प्रभुत्वयुक्तौ नहि तौ भवेताम् ॥
एतेषु देशेषु वशीकृतेषु प्रत्यर्थिभिः सञ्चितभूरिसैन्यैः ।
एकैकशोऽछाममही च जुम्ला दुल्लुः क्रियेरन्हि निजाधिपत्यैः ॥
पौरस्त्यदेशस्थकिरातवर्गोपजापहेतोः प्रतिपक्षवर्गैः ।
प्ररोचनापत्रमपि प्रकाशं नीतं सिताङ्गैरिति ते वचोऽस्ति ॥
पौरस्त्यदेशाश्रयिणः किराता बध्नीयुरग्लैर्यदि तैरजर्यम् ।
अन्याः प्रजाश्चापि किरातनंश्याः ततस्तु तस्यानुकृतिं विदध्युः ॥
आदुग्धकोशीसरितस्ततश्चाभेरीस्रवन्तीमवशिष्यसेतन् ।
रोष्ट्रं च भावत्कभुजप्रतापैः सुरक्षितं नैव भवेच्चिराय ॥

वैरीले यति ठूलो बन्दोबस्त गरी सक्या पछि हामीले दिन आँटेका इलाकाले उसको चित्त बुझ्न्या छेन । अथवा उसले हाम्रो शर्त मञ्जूर गऱ्या पनि पछिबाट टिपुसंगको जस्तै गर्न्या छ । टिपुसंग उसले पहिले लडाइँको खर्च बापत ६ कडोर रुपैयाँ र केही मुलुक लियो, पछिबाट सबै राज्य खोस्यो । हामीले उसलाई यतिका मुलुक छोडि दिंदा पनि पछिबाट उसले अर्को बखेडा खोजी-अरू इलाका पनि लिन्या छ । यतिको मुलुक गुमाया पछि हामी यतिका फौज राख्न सकन्या छैं नौं । हाम्रो पल्टनको बल घट्या पछि हाम्रो पूर्वपट्टिका अरू मुलुक कसरी बचाउन सकौंला हाम्रो दख्खलमा बेसहर रहन ज्यालसम्म गढवाल अटल रहन्या छ । यो छोडेको खण्डमो रवाइनका भोटे-हरूले हामिलाई सताउन्या छन् । अंग्रेजहरूले दून र रवाइन लिया भन्या गढवाल थाम्न सकिन्या छैन । यो गया पछि कुमाउँ र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

डोटी पनि जान्या छ। यी जग्गा लिया पछि एक एक गरी अ छाम, जुम्ला, दुल्लु पनि हामिसंग खोसि लिन्याछन्।

"पूर्व किरातका रैतीहरूका नाउँमा इस्तिहार जारी गरीएको छ" भन्या हजुरबाट हुकुम आएको छ। तिनीहरू वैरीसंग मिलेका भया अरू किरातका रैतीले पनि यसै गर्न्याछन्। वहाँ पछि पूर्व दूधकोसीदेखि पश्चिम भेरीसम्मको मुलुक पनि धेरै कालसम्म थामिन्या छैन।

(क्रमश')

धनवज्राचार्यः

त्रिपुरेश्वरसमीपस्थे जङ्गवहादुरमूर्तिसनाथे शिलास्तम्भे
समुत्कीर्णोऽभिलेखः। अयमभिलेखो
नेपालीभाषायां वर्तते। तस्यैव भावस्य
संस्कृतभाषायामनूक्तिरियम्।

[क्रमागतः]

पराभवाद्भीतवतो रणोत्थाद्वोटप्रभोः पत्रमुपाददानाः।
तदीयदूताः प्रणिपातपूर्वमकार्षुरागत्य च सन्धियाच्ञाम् ॥८॥
स्वगौरवं विक्रमशौर्यशंसि विवृण्वते भोटक्षितिपेन सार्धम्।
स कारयिष्यन्नु[1]पहारसन्धिपणं स्वकीयं न्यदधात्पुरस्तात् ॥९॥

(१) सम्प्रदानाद्भवति य उपहारः स उच्यते। ९।५।
अभियोक्ता बली यस्मादलब्ध्वा न निवर्तते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपहारादृते तस्मात्सन्धिरन्यो न विद्यते । ९।२२। इति कामन्दकीय-नीति सारे ।

अतः परं भोटधराधिपालो नेपालदेशाभिजनप्रजाभ्यः ।
तत्राऽवसद्भूयश्च वणिग्गणेभ्य शुल्कं न गृह्णातु गृहीतपूर्वम् ॥१०॥
नेत्रेन्दुनन्दावनि[१९१२]सम्मिताब्दाद्भोटक्षितीशः प्रतिवत्सरं सः ।
नेपालपालाय च रूप्यकाणि करं सहस्राणि दशार्पयेत ।११।
इत्यादिभर्यो नियमप्रबन्धै र्विधाय सन्धि दशधा विभक्तम् ।
नेपालभूमीश्वरगौरवं तु महद्धि सम्मानपदं व्यनैषीत् ॥१२॥
श्रुत्वाऽथदानं च तदीयमीदृक् प्रसेदिवांश्चीनपचक्रवर्ती ।
प्रशंस[१]या सार्धमनर्घपट्ट[२]मुपानयन्मन्त्रिवराय तस्मै ॥१३॥

(१) तत्राभिजनशरीरकर्मणां दोषवचनं निन्दा । २७ । गुणवचनमेतेषामेव प्रशंसा । २८ । [२।१०,२८ कौटलीयेऽर्थशास्त्रे] । (२) सम्मानार्थं वितीर्णो वस्त्रविशेषः । 'महानगरेषु च काव्यशास्त्रपरीक्षार्थं ब्रह्मसभाः कारयेत् । तत्र परीक्षोत्तीर्णानां ब्रह्मरथयानं पट्टबन्धश्चेति काव्यमीमांसायां राजशेखरः ।

विधाय वश्यां भरतस्य भूमिं प्रशासतस्ताम्रमुखाधिपस्य ।
दण्डो महान् भारतवर्षजातो भूपाश्च दण्ड्यो[१]पनताः कियन्तः ।१४।

[१] विजिगीषोर्दण्ड्योपनतः सामन्तः, एतच्चारतं कौटलीयार्थशास्त्रस्य दण्डोपनतवृत्ते द्रष्टव्यम् ।

समं समुत्थाय समन्ततोऽपि प्रकोपितास्ताम्रमुखाधिपाय ।
उद्दिश्य सर्वेऽप्यदसीयनाशं विद्रोहमेते विदधुर्महान्तम् ॥ १५ ॥
विद्रोहिभिस्तैः सितदेहभाजां दारेषु बालेष्वबलेषु सद्यः ।
व्यापाद्यमानेष्वखिलेषु यावद्वेदं प्रकोपेण यतस्ततोऽपि ॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्रीबालहत्या विहिता कथं नु विलोकनीयेति धियाऽऽकलय्य ।
सहायतामग्निनरेश्वरस्य कर्तुं प्रकोपप्रशमं विधाय ॥ १७ ॥
तावत्स सेनां महतीं स्वकीयामप्रेषयद्भारतयुद्धभूमौ ।
युद्धं व्यधात्साऽपि समेत्य तत्र विद्रोहिभिर्भारतवर्षजातैः १८।
वसुन्धरासागर (४१) सम्मिताब्दे स वर्तमानो वयसि स्वकीये ।
भूयोबलं भूरि बलं युयुत्सु सङ्गृह्य युद्धार्थमगात्स्वयं च । १९॥

स्तम्भाभिलेखस्य मूलरूपम् ।

पछि भोटवाट (बलि) ता लीयेर भोटका भारादार आई सलतन मागदा आफ्नु ज्यामर्दि राषि भोटले नेपालका माहाजन रयेत्संग ली थाप्राको महसुल जगात अघ प्रांत्त भोटवाट नलिनु भन्या वेहोरा र १२ सालदेखि सालवसाल १० हजार रुपैया भोटले श्रीनेपाल सरकारमा तिर्नु भन्या गेह मुद्दा १० का अहद गरि नेपाल श्री ५ सर्कारलाई मांन्या तुल्याउन्या येसै कुरामा बढिया बन्दोवस्त गर्‍यौ भनि श्री चिनवादसाहवाट निज वजिरका नाउमा षुसि नामाको षिलत आउन्या हिन्दुस्थानमा रह्याका वृटिस्सर्कारका फौज औ जगा जगाका राजा रजौताहरू उठि वृटिस् सर्कारसंग हंगमा गरि जगा जगामा रह्याका मिम बाबाः बाबिहरूलाइ मार्दा अस्त्रिहत्या बालहत्या गर्‍याको हेरिरहनु ता मुनासिब छैन भनि आपनु ४१ वर्षको उमेर हुदा वृटिस्सरकारका मदत निमित्त आफ्ना फौज पठाइ हंगमा गर्‍या रेबिलहरूसंग लडाञ्जी गरी फेरि भारि फौज लि आफै गै—

(क्रमशः)

ज्ञानमणिर्नेपालः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चक्रपाणिचर्चा

श्रीगोरक्षसाक्षात्कारसम्भावितमङ्गलस्य श्रीपृथ्वीनारायण-प्रस्थापितस्य नेपालविजयाग्रदूतस्य तस्यैव चक्रपाणिशर्मणः शब्दाः—शाके १६७५ चैत्रकृष्ण ७ अष्टमीप्राप्तौ शुक्रे मूलप्राप्तौ जन्मस्थलान्नवाकोटागमनार्थं प्रस्थितः ।

शाके १६७६ फाल्गुनीपूर्णिमायां होलिकाख्यायां पूर्वाफाल्गुनीनक्षत्रे बुधवारे गोधूलीवेलायां नवाकोटत्यागाय ; नेपालयात्राफलाप्तये निवासस्थलाद्दक्षिणस्यां नूतनेदृगृहे प्रस्थितोहं चक्रपाणिः ॥ ततो ललितपत्तनमागतः श्रीकुम्भेश्वरसन्निधौ तत्र स्थितिदिनानि ६६ शनौ प्रविष्टः ॥ ततः सोमे दशम्यां श्री २ मित्राज्ञया मित्रेण सह भक्तग्राममागतः दिनशेषघटी ३।३० समय आगमनकालः प्रवेशकालो गोधूलीसमयः नृपदर्शनं रात्रिगतघटीषु १।३० जातं ततो निवासार्थं चोछे दत्तं स्थलं । ।

अर्ज्यालवंशावल्याः कुलचन्द्रिकाया हस्तलिखितपुस्तिकायां मुखपत्रे चक्रपाणिहस्ताक्षरैरिदं वृत्तं लिखितम् भाषायां गातो इति प्रसिद्धमिदं कागदीयंभक्तग्रामे कृतं वेदितव्यम् षौमजू टोलायामिति।

[इदं पत्रं चक्रपाणिवंशधरपण्डितपद्मनाभकेशरिशर्मसौजन्यादुपलब्धम् । चक्रपाणिशर्मणा भक्तपुराधिराजजयरणजित्मल्लाश्रये स्थित्वा भूरि कार्यं कृतमिति प्रमाणानि तस्यैवर्षिकल्पस्य पार्श्वे सन्ति]

योगी देवीनाथः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमहासामन्तांशुवर्मणः
शासनाभिलेखः

कान्तिपुर्या वटुटोलाभिधानायां कुल्यामेकं हस्वमङ्कनं वर्तते। अङ्कने पश्चिमभागे चतुरस्रा स्वल्पा वेदिर्दक्षिणभागे देव्या मन्दिरं च वर्तते, पूर्वभागे चैका बहुविकृतिमापन्ना धृष्टा शिला तिष्ठति। शिलामुत्तरेणैकः कूपः दक्षिणेन सरस्वत्या मूर्तिस्तथा शिलायाः पृष्ठे ऽवसक्ता पार्वत्या सहासीनस्य सगणस्य भगवतश्चतुर्भुजस्य शङ्करस्य मूर्तिश्च प्रतिभाति। शिला पञ्चाङ्गुलाधिकपञ्चहस्तदैर्घ्या सैकाङ्गुलहस्तव्यायामा षडङ्गुलपिण्डा चास्ति। तस्यामेव शिलायामेषोऽभिलेखो वर्तते। अयमभिलेखो ऽप्रकाशितपूर्वो ऽस्ति।

शिलालेखस्य मूलरूपम्

१ (ॐ स्वस्ति कैलासकूटभवनात्)
२ (भग) वत्पशुपतिभट्टारकपादा (नुध्यातो बप्प)
३ (पा) दपरिगृहीतः श्रीमहा (सामन्तां) शुवर्मा कु (शली)
४ लिकान्यथाप्रधानङ्कुशलमाभाष्य (समाज्ञापयति-
विदितमस्तु वः)
५ प्रणालीकर्मपरितोषितैरस्माभि
६ प्रशामलपात्तसुकरकर (णार्थं)
७ (क) र्म्म स्वपञ्चापराधेन
८ मूद्धाण्डानि तथैव कर्त्य
९ स्वहि रनतिवाह्य वि(धेयः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१० (तदेवमधिगतार्थैरस्म) त्पादप्रतिबद्धजीवनै (रन्यैर्वा नायं)
११ (प्रसादोन्यथा करणीयो यस्) त्वेतामाज्ञामुल्लङ्घ्या (न्यथा कुर्या)
१२ (त्कार)येि(द्वा तं वयं न. मर्षयिष्यामो) नियतम्पुष्कला म.
(र्यादेयं)
१३ (भाविभिरपि भूपतिभि)र्गुरुकृतप्रसादानु (वर्तिभिः)
१४ (सम्यगनुपालनीयेति समाज्ञापना) दूतकश्चात्र युव (राजो)
१५ (दयदेवः संवत्) ..... आषाढ शुक्लदिवापञ्चम्याम्

अंशुवर्मणोऽन्येषु शिलाभिलेखेषु शिरोभागे यथा वृषस्य चक्रस्य वा चिह्नमङ्कितं विलोक्यते, तथा त्वत्र खण्डितत्वान्न दृश्यते किमपि। अत्र पङ्क्तयः पञ्चदश सन्ति। तासूपरितनायां पङ्क्तयामेकमप्यक्षरं न सुपठम् ।अन्यासु पङ्क्तिषु च घृष्टत्वात्खण्डितत्वाच्चोभयपक्षस्थानि बहून्यक्षराणि विकलानि वर्तन्ते। तेन प्रतिपङ्क्त्यक्षराणीयन्तीति वक्तुं न शक्यते। मध्ये यावान् भागो दृश्यते, तत्राऽक्षराणि सुन्दराणि स्थूलानि च सन्ति। अत्रत्यां लिपिं कुटिललिपिं वदन्ति बुधाः। श्रीमहा — शुवर्मा ' इति स्पष्टम् 'सामन्तां' इति विकलाङ्गैरक्षरैर्गम्यम्। सर्वेष्वंशुवर्माभिलेखेषु स्थानं कैलासकूटभवनं दृश्यते। तदेवात्रापि भवेत्। तत्रत्यप्रजानां प्रणालीकर्मणा परितोषितेनांशुवर्मणा शासनमिदं विहितमित्यत्र सुष्ठु प्रतीयते। शासनेनैतेन का मर्यादा स्थापिता, कश्चाधिकारः प्रजायै दत्त इत्यधिकललेखाभावेन न वयं सम्यग्विद्मः। परन्त्वंशुवर्मणोऽन्यशासनाभिलेखेषु पञ्चापराधं विना विवादपदस्य निर्णयाधिकारः प्रजायै दत्तो विलोक्यते (लेची सं९। वेण्डाल सं. १) अत्रापि " अपञ्चापराधेन " इति दर्शनात् तादृग्विधाधिकारो दत्त इत्यनुमीयते। पञ्चापराधो यथा—।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।

महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥ ११ । '५४ मनुस्मृतौ

'युव' इति दर्शनेनात्र दूतको युवराजोदयदेव एवेत्यस्मत्प्रतिपत्तिस्तस्यान्येषु शासनाभिलेखेषु तथा दर्शनात् (भगवानलाल लं. ७)। प्रायोऽशुवर्मणः शासनाभिलेखेषु सर्वत्र संधादिन्येव लेखशैली। तेन तदाधारेणैवात्रापि कानिचित्खण्डितवाक्यानि प्रकरणानुरोधेन पूरितानि ।

अथात्रास्य नेपालीभाषायामनुवादोऽपि प्रकाश्यते–

अनुवाद

(ॐ स्वस्ति केलासकूट भवन । दरबार] बाट)

(भग)वान् पशुपतिनाथका पाउ(को अनुग्रह पाएका, [आफ्ना] बाबुको) अनुग्रह पाएका, श्रीमहा(सामन्त अं)शुवर्मा [गाथमा] कुशल रही) ··· लिकहरूलाई यथोचित कुशल मङ्गल सोधेर (आज्ञा गर्नु हुन्छ। तिमीहरूलाई थाहा होओस् कि यो) धारो बनाउने कामले खुशी भएका हामीबाट ··· ··· ···

मल पयोक्न सजिलो (गर्नाका लागि) ···

काम ता पञ्चखत घाहेक

माटाका माँडाहरू त्यस्तै गर्ने ···· ···

न बिताईकन गर्नू

(भनी यो निगाहा भएको छ। त्यस कारण यस्तो कुरा छुटेका) हाम्रा हजुरबाट जीविका चलाउनेहरूले(र अरूहरू कसैले पनि यो निगाहा अन्यथा नगर्नू। जसले) यो हाम्रो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आज्ञा नाघेर (अन्यथा गर्ला वा गराउला, त्यसलाई हामी सहनेछैनौं ।) पक्का ठूलो यो म(र्यादालाई पछि हुने राजाहरूले पनि) मान्य जनद्वारा गरैको निगाहाको ख्या(ल राख्ने भई राम्ररी पालमा गर्ने होऊन् भन्ने हाम्रो आज्ञा छ ।) यस घातका दूतक [मार्फत] युव(राज उदयदेव छन् ।)

(इति संवत्) ..... आषाढ शुक्ल पञ्चमी

धनवज्रवज्राचार्यः

ज्ञानमणिनेपालः

ॐ

गोर्वाणयुद्धसंकल्पः

अद्येत्यादि पूर्वोच्चारितविविधविशिष्टायान्तिथौ काश्यपगोत्रस्य गीर्वाणयुद्धविक्रमदेवस्यास्मिन् आकिरातकूर्माचलान्तमण्डले पूर्वापरदीर्घस्वसीमोदक् याम्या दुर्हृदफिरङ्गिवैरिकर्त्तृकच्छल छिद्रद्रोहसाम्राज्यविघटनोद्यनैकोपद्रवनिराकरणपूर्वकस्वदीयगति बुद्धिसाहसतनयसैन्यकोषात्मीयकलहोपतापाद्यनैकोपद्रवद्वारास्मदीयदेशतो निःसारणपूर्वकं विच्छिन्ननष्टविगतसाहसतया कथंकथमपि फिरङ्गिभयनिवारणार्थं राज्यरक्षार्थमेभिर्गङ्गोत्तर्य्यानीतशतरुद्रीसङ्ख्याकगङ्गाजलैः श्रीपशुपतिनिजशिवोपर्य्यभिषेकं पूजकब्राह्मणद्वारा करिष्ये (तदनन्तरमन्तः प्रविश्यैकादशाऽर्य्यालैः।) इत्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(प्राचीनमूलदलमस्य पं. पद्मनाभकेशरिशर्मार्ज्यालस्य सम्मी पे वर्तते ।)

योगी देवीनाथः
मृगस्थलीगोरक्षपीठे

मल्लसमयाभिलेखः ।

(वि. सं. १४४४)

देवपत्तने जयवागीश्वरीमन्दिरसमीपे प्रणालयामयमभिलेखो वर्तते । लिच्छविकालजां इमां प्रणालीं विकृतिमापन्नामभिवीक्ष्य स्त्रिया विरहातुरः स्थितिमल्लः संचस्कार । मल्लसंस्कृतां च तां विकृतिमापन्नां पुनश्चन्द्रशमशेरः संचस्कार । अयमभिलेखश्च स्थितिमल्लकृतां संस्कृतिं दर्शयति तात्कालिकीं स्थितिं च । अस्य संपादने सहायकं नेपालोपनामानं ज्ञानमणिशर्माणमभिनन्दामः ।

१ ॐ न (मः शिवा)य ॥ श्रीमत्पाशुपताङ्घ्रिपङ्कजरजः पिंगै ··· स्फीता

२ ञ्चिवः ····· तरिपुः स्वप्रक्रियालंकृतः श्रीमान् श्रीस्थितिराजमल्ल इति यः

३ ख्यातः ····· तौ नेपाले जयति स्म निर्मलयशोऽयोत्स्नासुधार्दाधिषिः ॥ १ ॥ तस्याभू

४ ब्रघुवंश(जस्य धरणि)प्रोद्भूतपद्मालया प्रत्यर्थिक्षितिपालमौलिकुसुमैर्नीराजितांघ्रिः सती पत्नी

५ धर्मधुरन्धरा धरतनू राजल्लदेवीति या प्रख्याता (विपुल) प्रतापदहनालीढारिदर्पाटवी ॥ २ ॥ यस्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६ श्रीजयधर्ममल्ल इति (य :) ख्यातः कुमाराग्रणीः सूनुः सर्व-
गुणाश्रयः पृथुयशा वृद्धोपसेवारतः । माद्य (न्मस्त)
७ गजेन्द्रकाननचरद्राजेन्द्रपञ्चाननः स्वलोंकादवतीर्णवानिव
हरिस्त्रातुं जनान्भूतले ॥ ३ ॥ कुमार श्री जय (ज्यो)
८ तिर्मल्लदेवश्च मध्यमः । सूनुर्यस्या धनुर्वेदे सदाभ्यस्त इवार्जुनः
॥ ४ ॥ धर्मकीर्तिप्रभायुक्तो रघुवंश (स)
९ (मुद्) भवः । कनिष्ठतनयो यस्याः कीर्तिमल्लः सुधाकरः ॥ ५ ॥
सा सोमसूर्याग्निसमानदीप्तानेतान्कुमारा (न्सहसा)
१० (विहा)य । देवेन्द्रलोकं समगान्नृलोके (कं) कीर्त्या
समापूर्य हि कीर्तिशेषा ॥ ६ ॥ तस्यां च देव्यां त्रिदिवं गतायाम
११ स्तं गतायामिव चन्द्रिकायां ॥ शोकाभिभूतं जगदन्धकारं
हाहारवाकीर्णदिगन्तरालं ॥ ७ ॥ राजल्लदेव्यास्त्रि
१२ दिवं गतायास्तस्याः सुधापानसमृद्धयेस्याः ॥ नाम्नाऽकरोत्
श्रीस्थितिराजमल्लः प्रणालिकां हेममयीं सुदीनां
१३ ॥ ८ ॥ महाप्रयत्नेन जलं सुदूराद्भगीरथो गाङ्गमिवेशमूर्ध्नः ॥
आनीय चाद्याङ्गगुणैरुपेतां सुदुर्लभां दिव्य
१४ जलप्रवाहां ॥ ९ ॥ जीर्णां भग्नां दिवं (व्य) स्वर्णशोधिता
पूर्वजैरियं । पुनःसंस्थाप्य विधिवत् श्रीजयस्थिति
१५ भूभुजा ॥ १० ॥ तस्या देव्याः समुद्देशात्क्रियते स्म प्रणा-
लिका । सुवर्ण ..... जलयागपुर
१६ स्सरम् ॥ ११ ॥ पञ्चपट्टयुतैः पात्रैः कारयित्वा महोत्सवं ।
प्रतिष्ठा च कृता तस्या महासम्भारधि
१७ स्तरा ॥ १२ ॥ अनेन पुण्येन च देवलोके राजल्लदेवी सुचिरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थितास्तु ॥ दिव्यामृतास्वादमत

१८ प्तचित्ता देवेन्द्रव (यैर) भिपूजितांघ्रिः ॥ १३ ॥ अष्टाधिके पञ्चशते मितेब्दे नेपालिके मासि च मा

१९ र्गशीर्षे । शुक्ले दशम्यां सुरपूज्यवारे चा(च)र्भे तथा रेवतिकाभिधाने । १४ ॥ राजल्लदेव्यै त्रिदिवं स्थिता

२० यै तद्भूभुजा श्रीस्थितिमल्लनाम्ना ॥ गुणावदातेन सहात्मजेन (कृता प्रतिष्ठा) कनकप्रणाल्याः ॥

२१ १५ ॥ य इमामत्य..... ते नरा नरकानुगाः । तेषां रोगेण मृत्युश्च विप..... श्च जायताम् ॥ १

२२ ६ ॥ य इमां परिरक्षन्ति ते नराः स्वर्गगामिनः (णः) तेषामायुश्च कीर्तिश्च लक्ष्मीश्चापि प्रवर्द्धताम् ॥ १७ ॥

२३ सर्वे सन्तु वसुन्धराधिपतयः षड्वर्गशत्रुच्छिदो ॥ विप्रा वेदपरा भवन्तु सुधियः सन्तु प्रवृद्धाः

२४ प्रजाः । काले सन्ततवर्षिणश्च जलदाः संपूर्णशस्या मही भूयाद्वेगणाः सदा हुतहविर्गृ

२५ (हृणन्तु य) ज्वानले ॥ १८ ॥ स्वस्ति श्रीश्रीपशुपतिपादपंकरुहमधुलि.....

२६ ..... लब्धकृपाणशासितान्यमहीपालश्रीजयस्थितिराजमल्लदेवेन

२७ ..... इयं प्रणालिका प्रदत्तेति॥ नेपालिकसम्वत्सर ५०८ मार्ग..... वृहस्पति.....

२८ .....नक्षत्रे वरियानयोगे करणे.....तदा राजा विध

२९ ..... नायक ॥ श्रीविष्णु.....

स्थानाभावादस्यानुवादोऽत्र न प्रकाशितः । आगामिन्यङ्के प्रकाशयिष्यते ।

वाबुराम आचार्यः

नयराजः पन्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नियमाः

[१] (संस्कृत-सन्देश) नामकमिदं मासिकं पत्रं प्रतिमासं शुक्लैकादश्यां प्रकाश्यते ।

[२] पत्रेऽस्मिन्नेतिह्यासिका एवं विविधोपयुक्त-विषय-विभूषिताश्च लेखाः प्रकाश्यन्ते ।

[३] व्यक्तिगताऽऽक्षेपयुक्ता लेखा न प्रकाश्यन्ते ।

[४] पत्रस्यास्य वार्षिकमूल्यं रूप्यकचतुष्टयं षाण्मासिकं सार्धं रूप्यकद्वयं मासिकमर्द्धरूप्यकं लगिष्यति । पूर्वमेवदातव्यं भविष्यति ।

[५] लेखानामानुकूल्ये सम्पादक-मण्डलस्याधिकारो वर्तते ।

सूचना

[१] मूल्यादयः पत्रादयश्च इदानीं "एं. बुद्धिसागर परानुली वीरपुस्तकालय घण्टाघर नेपाल" इति सङ्केतेन प्रेषणीयाः

[२] पत्रस्यास्य महोपयोगितां विचारयद्भिर्विद्वद्भिर्ग्राहकैश्च परिवर्द्धनाय मूल्यमुपयोगिनो लेखाश्च नियतसमये प्रेषणीयाः । स्वस्थानस्य परिचयोऽपि सुव्यक्तमुल्लेखनीयः ।

संस्कृतविस्तृतिहेतोः, संस्कृतसन्देशमासिकं पत्रम् ।
भुवनाभ्यन्तरविदुषां, श्रुतिपुटकान्ते वहतु सन्देशम् ॥

योगी नरहरिनाथः

सदसतीये पमहाबौद्धमासङ्कुलीनेपालतो मुद्रितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब. पु. गो. द. नं. २०३३

श्रीसंस्कृतसन्देशसहयोका ग्राहकाश्च

महानुभावाः

श्री भिक्षु. बुद्धसागर ५। श्री लीलाध्वज थापा ४।
श्री प्रो. ताराप्रसाद ४। श्री बालकृष्णसम ४।
श्री पं. श्रीनाथशर्मा ४। श्री अक्रूरशर्मा ४।
श्री पं. उपाध्यक्ष हरिनाथशर्मा ४। श्री दिव्यमङ्गल जोशी ४।
श्री पं. देवीप्रसादशर्मा भण्डारी ४। श्री सुवेदार रामलाल
श्री पं. बद्रीनाथशर्मा ४। फवर ४।
श्री पं. यदुनाथशर्मा ४। श्री शक्तिमान जोशी ४।
श्री पं. तीर्थराम झा ४। श्री प्रो. गोदत्तमान श्रेष्ठ ४।
श्री पं. राधाकृष्णशर्मा ४। श्री साहु हर्षरत्नतुलाधर ४।
श्री सम्पादक-प्रेमराजशर्मा ४। श्री ज्ञानरत्नवज्राचार्य
श्री पं. रत्नबहादुरवज्राचार्य ४। वागीश्वरप्रेस काठमाडौं ४।
श्री विष्णुमणिआचार्य चाचेल ४। श्री मुक्तिप्रसाद प्रधान
मखन काठमाण्डौं ४।

नाढं मोहतमोभिरावृततनोरैतिह्यदीपस्य य-
स्वायाणेषु यतस्ततोऽपि विकलं ज्योतिः समुज्जृम्भते।
भो ऐतिह्यविदो विवन्तु, भवतां कृत्यं स दीपो यदि
स्यज्योतिःपथ एव सत्वरमृजुर्युष्माभिरालम्ब्यताम् ॥१॥
तत्राऽप्यस्ति तमोपहं सुरगिरोऽभ्यासाज्जितं लोचनं
चेत् प्राप्तास्थ सदेशिका ऋजुपथेनैतिह्यदीपान्तिकम्।
नो चेद् ध्वस्तपथाः प्रवेक्ष्यथ तमःपारं यतो नाप्स्यथ
तस्मादुद्यत एव संस्कृतगिरं ज्ञातुं परिश्राम्यत ॥ २॥

ज्ञानमणि-नेपालः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu